पणवो नमो भगवओ विज्जापज्जंतवन्नतेत्तीसं (३३) ।
एसा सुविणनिमित्तं पकित्तिया बाहुबलिविज्जा[१] ॥१२॥

हिलि हिलि किलि किलि ए ए अट्ठक्खर गिसहविज्जगऽवत्था ।
चक्के(क्के)सरीए दिन्ना तो(ता?) ठविया दुइयपीढम्मि ॥१३॥

अह वग्गुवग्गुपमुहा महुमहुरं जाव वन्नबावीसा(२२) ।
सोहग्गविज्ज एसा झायव्वा जोणिमुद्दाए ॥१४॥

हिलिहिलिपमुहा आयरिय कालिपज्जंतवन्न अडतीसं(३८) ।
एवं बीइए पीढे तिनवइ (९३) सव्वक्खरा हुंति ॥१५॥

इरियाए पमुहवन्ना कालि-महाकालि जाव पणतीसं(३५) ।
तइयं पीढं लच्छीअहिट्ठियं लच्छिफलहेउं ॥१६॥

इरिइरिकालिप्पमुहा आयरियायरियकालिपज्जंता ।
छायालीसं(४६) वन्ना चउत्थए मंतपीढम्मि ॥१७॥

पंचमपीढे इरिमेरुपमुह आयरियमेरुपज्जंता ।
तीसं(३०) वन्ना स्वाहा जुत्ता बत्तीस नायव्वा ॥१८॥

सयलम्मि सूरिमंते अट्ठुत्तरिजुत्ततिन्निसयवन्ना (३७८)।
इक्कारस य सिलोगा छव्वीसं अक्खरा य तहा ॥१९॥

सूरीणं मंतपए चउसयसत्तुत्तरक्खरा(४०७) हुंति ।
उचियट्ठाणे पणवाण वेय(४)[२] स्वाहाण गहणाओ ॥२०॥

अक्खीणमहाणसिलद्धि-सव्वलद्धीण[३] दोपया ए ए ।
गच्छाहिवमंतपए मुहम्मपयओ पुरो हुंति ॥२१॥

तेरस अट्ठ य वन्ना एवं इगवीसवन्न इह अहिया ।
तेरस सिलोग बारस य अक्खरा सव्वसंखाए ॥२२॥

---

१ एषां स्वप्ननिमित्तं बाहुबलीविद्या प्रकीर्तिता ॥

२ 'वेद' इति आद्यचतुःपीठेषु मन्त्राक्षरप्रान्ते पठे चतुःस्वाहानां लिखनात् पञ्चमपीठे त्वग्रेऽपि गृहीतोऽस्तीति ॥

३ 'ॐ नमो अक्खीणमहाणसिलद्धीणं' 'ॐ नमो सव्वलद्धीणं' इति पदद्वयं पठे स्फुट (?) ॥

जावइया[1] तावइया बारसअट्ठारसाइलद्धिपया ।
इय वयणाओ सोलसअट्ठारसलद्धिपय इत्थ ॥२३॥
एयस्स साहणे किर जो उविही पइपयं फलं जं च ।
तं नेयं पुव्वरिसिप्पणीयसिरिमंतकप्पाओ ॥२४॥

अथ श्रीउपाध्याय विद्या—

"ॐ ह्रीं नमो अरिहंताणं ५[२] । ॐ ह्रीं नमो भगवंतस्स अरिहंतस्स महइ महावीर-वद्धमाणसामिस्स सिज्झउ मे भगवई महइ महावीरवद्धमाणसामिणी महाविज्जा" । परमेष्ठिपदैः पञ्चभिः ॐ-ह्रींयुग्भिः सपञ्चयुगवर्णाः(४५) ॐ ह्रीं नमो इति विद्याप्रान्तैर्वेदाक्षमित(५४) वर्णाः, १ ॐ ह्रीं वीरे, वीरे, ॐ ह्रीं महावीरे, महावीरे, ॐ ह्रीं जयवीरे जयवीरे, ॐ ह्रीं सेणवीरे सेणवीरे, ॐ ह्रीं वद्धमाणवीरे वद्धमाणवीरे, ॐ ह्रीं जए, ॐ ह्रीं विजए, ॐ ह्रीं जयन्ते, ॐ ह्रीं अपराजिए, ॐ ह्रीं सव्वट्ठसिद्धे निव्वुए महाणसे महाबले स्वाहा ॥

बीजद्वयाद्[३] द्विरुक्ता स्याद् वीरे पञ्चपदी ततः ।
चतुष्पदी जयाद्या द्व्यनुक्ता सव्वट्ठमुख्यकी ॥२॥
संलग्ना पञ्चपद्येवं वर्णाश्चन्द्र-निधिप्रभाः(९५) ।
षट्श्लोकाः स्युर्द्विवर्णोना एतैः प्राग्वर्णसंयुतैः ॥३॥
अक्षैर्निषद्यया सार्द्धमुपाध्यायपदास्पदम् ।
देया योग्याय शि(शै)क्षाय विधेयं सर्वकर्मकृत् ॥४॥
[इति] श्रीमहोपाध्यायमन्त्रः ॥१॥

अथ श्रीप्रवर्त्तकमन्त्रः—

"ॐ नमो भगवओ अरिहंतस्स महइ महावीरवद्धमाणसामिस्स सिज्झउ मे भगवई महई महाविज्जा । ॐ वीरे वीरे महावीरे जयवीरे वद्धमाणवीरे महानंदणे सिद्धे सिद्धक्खरे सिद्ध-

---

१ यावन्ति तावन्ति द्वादशादि—अष्टादशादिलब्धिपदानि स्युः । केषाञ्चित् १२, केषाञ्चित् १३ इत्यादि परं द्वादशान्तर्न स्युः । एवं केषाञ्चित् १८ केषाञ्चित् १९ इत्यादि ॥ २ अत्र पञ्चकाङ्काभिज्ञानात् पञ्चापि पदान्येवमेव स्मर्याणि यथा— ॐ ह्रीं नमो सिद्धाणं, ॐ ह्रीं नमो आयरियाणं, एवं पञ्चापि पदानि ज्ञेयानि । ततः ॐ ह्रीं नमो भगवंतस्सेत्यादि पञ्चकांके सर्वत्रैवमेव ॥

३ ॐ ह्रीं इति बीजद्वयाद वीरे इति पञ्चपदी द्विरुक्ता कार्या। वीरे—वीरे इत्यादि । ततो बीजद्वया चतुष्पदी जयाद्या द्व्यनुक्ता स्यात् । ततो बीजद्वयात् सवट्ठाद्या पञ्चपदी संलग्ना प्रतिपदं बीजाभावात् ॥

वीए अणिहए नायचोसे सारवन्ते घोससारे परले परमसुहए जए विजये जयंते अपराजिए सव्वुत्तमे परमपयत्ते स्वाहा" ।

ॐ नमो विद्यान्तर्वर्गाः शशि-वार्धि(४१) संख्यका ज्ञेयाः ।
पञ्च(५)चतुष्कय(यं)-(४-४-४)-षट् (६)-शर(५)-कर(२)-युगषट्क-
(४-४-४-४-४-४)त्रयः(३)षट्(६)च ॥१॥
द्वि(२)गुण(३)गुणाः(३)शर(५)युग(४)रस(६)करा(२) इति द्व्यधिकविंश(२२)पदवर्गाः ।
अष्टाशीतिः(८८)सर्वाक्षरयुक्ता(४१) नव-करेन्दुमिताः(१२९) ॥२॥
श्लोकचतुष्टयमेकाक्षराधिकं देयमिह महत्तरयोः ।
अतिशयविद्या एताः पदं विना नयति मात्र स्युः ॥३॥

अत्र महत्तरयोरिति महत्तरः प्रवर्त्तकः । महत्तरा साध्वीसत्कं मुख्यपदम्, ततो द्वन्द्वसमासः ।

[इति] प्रवर्त्तकमन्त्रः ॥२॥

अथ स्थविरमन्त्रः—

"ॐ ह्रीं नमो अरिहंताणं ५ ॥ ॐ ह्रीं ह्रूं नमो जिणाणं । ॐ ह्रीं नमो ओहिजिणाणं । ॐ ह्रीं नमो परमोहिजिणाणं । ॐ ह्रीं नमो सव्वोहिजिणाणं । ॐ ह्रीं नमो अणंतोहिजिणाणं । ॐ ह्रीं नमो कुट्ठबुद्धीणं । ॐ ह्रीं नमो पयाणुसारीणं । ॐ ह्रीं नमो संभिन्नसोयाणं । ॐ ह्रीं नमो चउदसपुव्वीणं । ॐ ह्रीं नमो अट्ठंगनिमित्तकुसलाणं । ॐ ह्रीं नमो आगासगामीणं । ॐ नमो भगवओ अरिहंतस्स महइ महावीरवद्धमाणसामिस्स सिज्झउ मे भगवई महइ महाविज्जा ॐ वीरे वीरे महावीरे जयवीरे सेणवीरे वद्धमाणवीरे जए विजए जयंते अपराजिए सव्वट्ठसिद्धे अणिहए महाणसे महाबले मा चल मा चल ॐ ह्रीं नमस्स स्वाहा । ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः स्वूं क्लौं स्वाहा" ।

पंचपरमिट्ठिनसा ॐ ह्रीं जुत्ता हवंति पणयाला ।
जिण-ओहिजिणाण नमो परमव्वाणंतओहिजिणा ॥१॥
तो कुट्ठबुद्धि-पयाणुसारि-संभिन्नसोयसाहू य ।
चउदसपुव्वी अट्ठंगनिमित्ताउ कुसलसाहू ॥२॥
य विउव्वणिड्ढिपत्ता विज्जाहरपन्ह (ण्ह) समणसाहू य ।
आगासगामि कट्ठी चहुवयणंता नमो पुव्वा ॥३॥

---

१ ॐ वीरे वीरे इति ५ चतुष्कयमिति चतुर्णां त्रयं चतुष्कं त्रिषु पदेषु चत्वारश्चत्वारो वर्णाः इत्यर्थः ।
२ युगषट्कमिति षट्सु पदेषु चत्वारश्चत्वारो वर्णाः एवम् ॥

ॐ ह्रीं ह्वं पढमपए ॐ ह्रीं सेसेसु हुंति आइए।
अट्ठं(८)-नव(९)-रुद्द(११)-दस(१०)-सिव(११)-नवए(९)
दस(१०)-दस(१०)-रुद्द(११)-चउदस(१४) य ॥४॥
तेरस(१३)-नव(९)-दस(१०) पुण दस(१०)
पणयालहियं सयं(१४५) सयलवन्ना।
जा वद्धमाणवीरे[1] महत्तरामंतवन्नचउसट्ठी(६४) ॥५॥
जय-विजय-जयंत-पराजिएसु सव्वट्ठसिद्ध इय वन्ना।
अट्ठार[स](१८) अणिहए महाणसे महाबले य बारस(१२) य ॥६॥
मा चल मा चल ॐ ह्रीं जसक्षस्वाहेति वन्न तेरस(१३) य।
ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः
पणवो कर जुग-रिउ-मणुसरजुयहरबिंदुजुत्ता य ॥७॥
सविसग्गो हरवन्नो रिउमणुसरबिंदुजुत्तसरवन्ना।
स्वाहेति दस य सव्वे सत्तहिया तिसय(३०७) इह वन्ना ॥८॥

अनयोर्व्याख्या—१ पणवो ॐ कर(२)-युग(४)-ऋतु(६)-मनु(१४)प्रमितस्वरयुक्ता हरेवि ह्रवर्णा बिन्दुयुक्ताश्च तथा ह्रां ह्रीं ह्रूं ह्रौं सविसर्गो ह्रवर्णः, यथा—ह्रः। ऋतु-मनु-स्वरबिन्दुयुक्तौ स्तवर्णौ, यथा—स्तूं स्तां।

एवं नव(९) य सिलोगा एगूणवीसं(१९) च अक्खरा हुंति।
एस किर थविरमंतो तिहुयणमणमोहणो भणिओ ॥९॥

[इति] स्थविरमन्त्रः ॥३॥

अथ गणावच्छेदकमन्त्रः—

"ॐ ह्रीं अर्हं ह्रूं ह्रः ह्रौं नमो वर्द्धमानस्वामिने स्वाहा। ॐ वीरे वीरे जयवीरे महावीरे सेणवीरे वद्धमाणवीरे जए विजए जयंते अपराजिए सव्वट्ठासिद्धे[2] निव्वुए महाणसे महाबले स्वाहा"।

१ पाश्चात्योक्ते महत्तरामन्त्रे, यथा— ॐ नमो भगवओ इत्यादि वद्धमाणवीरे यावत्। ६६ वर्णास्ते तथैवात्रापि ज्ञेया इत्यर्थः ॥

२ सर्वार्थात् सिद्ध इति ॥

पणवो मायाबीयं जिणबीयं छट्ठसरविसग्गेहिं ।
चउदससरेण य जुयं हरेति वन्नतियं कमसो ॥१॥
विंदुजुयआइअंते तओ नमो वद्धमाणसामिणे स्वाहा ।
पणवो वीरे जुयलं जयवीरे तह महावीरे ॥२॥

गाथांशव्याख्या–षष्ठस्वरविसर्गाभ्यां चतुर्दशस्वरेण च युतम्, हरेति वर्णत्रिकं आदावन्ते बिन्दुयुतम्, यथा–हूं हः ह्रौं ।

अह सेणवद्धमाणाउ वीर-जय-विजय तह जयंते य ।
अपराजिय सव्वट्ठासिद्धे तह निव्वुए चेव ॥३॥
समहाणसे य समहाबले य स्वाहेति विज्जगणवच्छे ।
पढमट्ठारसवन्ना(१८) पणचउचउचउछदुतितितिन्नि ॥४॥
पणपंचतिचउचउरो दुन्नि य सव्वेवि एव चउपन्ना(५४) ।
दुन्नि सिलोगा अट्ठक्खरा य गणवच्छमंतम्मि ॥५॥
एषा पञ्चाननी विद्या सूरिविद्या समा मता ।
यन्त्रे लिखित्वा विधिवत् पूज्या ध्येया च नित्यशः ॥६॥

सर्वेषां यन्त्रलेखनविधिरग्रे वक्ष्यते ।

[इति] गणवच्छ(च्छे) (दक)मन्त्रः ॥४॥

अथ वाचनाचार्य-प्रवर्तिन्योर्मन्त्रः—

"ॐ ह्रीं नमो अरिहंताणं ५ पद । ॐ नमो भगवओ अरिहंतस्स महइ महावीर–वद्धमाणसामिस्स सिज्झउ मे भगवई महई महाविज्जा । ॐ वीरे वीरे महावीरे जयवीरे सेणवीरे वद्धमाणवीरे जए विजए जयंते अपराजिए अणिहए ॐ ह्रीं स्वाहा" ॥

परमेष्ठिपदैः पञ्चभिरों-ह्रींयुग्भिः सपञ्चयुगवर्णाः(४५) ।
'ॐ ह्रीं नमः' इति विद्याप्रान्तैर्भुजवार्द्धयो(४२) वर्णाः ॥१॥
पञ्च(५) युगत्रय(४-४-४) ऋतवो(६) द्वि(२)-गुण(३)-गुणाः(३)
पञ्च(५) वार्द्धि(४)-नयन(२)-का(क)राः(२)।
सर्वैरथ चत्वारः श्लोका वर्णत्रयं शेषम् ॥२॥

विधैषा वाचनाचार्य-प्रवर्त्तिन्योः शुभऽह्नि ।
देया सातिशये चैत्ये विधिना सर्वकर्मकृत् ॥३॥
[इति] वाचनाचार्य-प्रवर्त्तिनीमन्त्रः ॥५॥

अथ पण्डितमिश्रमन्त्र—

"ॐ नमो भगवओ महइ महावीर-वद्धमाणसामिस्स(णस्स) सिज्झउ लहुं भगवई महई महाविज्जा । ॐ वीरे वीरे महावीरे महावीरे सुवीरे जयवीरे सेणवीरे वद्धमाणवीरे जया अपराजिए स्वाहा"

पणवो नमो भगवओ महइ महावीर-वद्धमाणस्स ।
सिज्झउ लहुं भगवई महई पुरओ महाविज्जा ॥१॥
पणवो दुरुत्तवीरे दुमहावीरे सुवीर-जयवीरे ।
तह सेणवीरवद्धाउ माणवीरे जया चेव ॥२॥
स(अ)पराजिए सस्वाहा विज्जा पज्जंतवन्न पणतीसा(३५) ।
पणअट्ठातिचउचउरो रिउ रिउ दो एव अडतीसा(३८) ॥३॥
सव्वे वन्नतिहुत्तरि(७३) सिलोग दो अक्खरा नव य विज्जा ।
जुग्गस्स चेव पंडियमिस्सस्सउ एस दायव्वां ॥४॥
[इति] पण्डितमिश्रमन्त्रः ॥६॥

उपाध्यायादियोग्याः[१] श्रीवर्द्धमानेन कीर्त्तिताः ।
वर्द्धमानाख्यया ख्याता विद्यास्तेनाखिला इमाः ॥१॥
तत्राप्याद्याश्चतस्रः स्युर्यस्य स ज्येष्ठतां भजेत् ।
तेषामेव पटे यन्त्रालेख्या नेतरयोः पुनः ॥२॥

अर्हं ॥

अथ श्रीगच्छेशानां प्रतिष्ठाक्षणे प्रथमं या ऋषभविद्या दीयते सा प्रकाश्यते । "ॐ नमो अरिहंताणं, ॐ नमो सिद्धाणं, ॐ नमो आयरियाणं, ॐ नमो उवज्झायाणं, ॐ नमो लोए सव्व-साहूणं, एसो पंच नमो(मु)क्कारो, सव्वपावपणासणो मंगलाणं च सव्वेसिं पढमं होइ मंगलं" ॥

अथवा पदपञ्चकमेव । यद्वा "ॐ नमो जिणाणं १, ॐ नमो ओहिजिणाणं २, ॐ नमो

१ उपाध्याय-प्रवर्त्तकादीनां योग्याः ६ विद्या वर्द्धमानजिनोक्तत्वाद् वर्द्धमानविद्या उच्यन्ते । तत्र आद्यासु चतसृषु ज्येष्ठो भवेद् नान्ययोर्द्वयोः ।

परमोहिजिणाणं ३, ॐ नमो सव्वोहिजिणाणं ४, ॐ नमो अणंतोहिजिणाणं ५, ॐ नमो केवलिजिणाणं ६, । ॐ नमो भगवओ अरिहओ उसहसामिस्स सिज्झउ मे भगवई महई महाविज्जा । ॐ नमो भगवओ अरिहओ उसहसामिस्स आइतित्थगरस्स जस्सेयं जलंतं गच्छइ चक्कं सव्वत्थ अपराजियं । आयावणी ओहावणी मोहणी थंभणी जंभणी हिलि हिलि कालि कालि चारणाणं भंडाणं भोइयाणं अहीणं दाढीणं नहीणं सिंगीणं वेरीणं चोराणं जक्खाणं पिसायाणं मुहबंधणं दिट्ठिबंधणं करेमि ठः ठः स्वाहा" ॥

पुन्नपरमिट्ठिवन्ना बावत्तरि(७२) पणपएसु चालीसा(४०) ।
अहवा नंदिपएसुं छसु वन्ना हुंति बावन्ना(५२) ॥१॥

यदुक्तम्–

सर्वविद्यास्मृतावादौ पूर्णा पञ्चनमस्कृतिः ।
यद्वा पञ्चपदी वाच्या मुनिना पणवादिमाः ॥२॥

यदिवा–

नमो जिनावधि(१-२)जिनाः परात्(३) सर्वाद्(४) अनन्ततः ।
अवधिजिनाः केवलि(६)जिनेभ्यो नम इत्यपि ॥३॥

तदनु–

पणवो नमो भगवओ विज्जा पज्जंतवन्नवत्तीसं(३२) ।
अपराजियपज्जंता तुँपमुहा वन्नतेयाला (४३) ॥४॥

चउ(४) चउ(४) ति(३)ति(३)तिग(३) चउ(४) चउ(४) तिग(३)
चउ(४) चउ(४) सत्तगं तिगाणं(३-३-३-३-३-३-३) तु ।
चउ(४) पंच(५) पंच(५) तिग(३) दु(२) दु(२)
अट्ठहिया(७८) सत्तरी सव्वे ॥५॥

एवं तिपन्न(३५३)अहियं वन्नसयं उसहसामिविज्जाए ।
तिपयारवुत्तलद्धीपयाण पुरओ भवे एसा ॥६॥

प्राग्भेदः सर्वकार्यार्थं द्वितीयो मोक्षहेतवे ।
तृतीयो ज्ञानकार्येषु एष लब्धिपदक्रमः ॥७॥

श्रीगच्छेट्पदयोग्याय प्राक् प्रतिष्ठामुहूर्त्ततः ।
शुभे दिने प्रदेयाऽसौ साध्या तेनापि तद् यथा ॥८॥
यस्य देवस्य विद्याऽस्ति तस्य चैत्येऽतिशायिनि ।
चतुर्थतपसाऽष्टाधिसहस्रं जातिजैः कुसुमैः॥९॥
तमर्चयेदथवाऽस्य कराब्जे शालितण्डुलान् ।
मुञ्चत्यष्टाधिसहस्रं विद्यालीनमना मुनिः ॥१०॥
सिद्धायामिति विद्यायां सम्यक् तत्त्वभृतां भृशम् ।
इमां कार्ये प्रयुञ्जीत नान्यथेत्यस्ति जैनगीः ॥११॥
वर्द्धमानोपदिष्टत्वाद् वर्धमानाभिधा इमा ।
इति श्रीवीरचैत्याङ्कसर्वाः साध्यास्तु मन्मतिः ॥१२॥
प्रतिष्ठालग्न एवाधिवासनांशक्षणेऽथवा ।
सूरिमन्त्रचतुःपीठदानेऽसौ प्राक् प्रदीयते ॥१३॥
प्रतिष्ठांशक्षणे पश्चाद् दातव्याः सप्तमेरवः ।
संसाध्यर्षभविद्यां तु सूरिमन्त्रं प्रसाधयेत् ॥१४॥

अर्हं ॥

तत्साधनाविधिश्चैवम्ः—

यस्मिन् देशे चक्री राजा वा राज्यं करोति, यत्र स्वचक्र-परचक्रोपद्रवो न स्यान्न च दुर्भिक्षम्, यत्र च विशिष्टं तीर्थम्, तत्र देशे रम्योपश्रुतिशकुनैर्गुर्वादेशेन गत्वा श्री-ह्री-धर्म-प्रधानजनसंकुले क्षेत्रे स्थित्वा दुष्टनर-तिर्यगीक्षणत्यक्ते श्रीऋषभस्य चन्द्रप्रभस्य श्रीवीरस्य वा चैत्ये, तदभावे निःशल्ये समभूमिकेऽतिस्तोकजनप्रसरे पूर्वोत्तरामुखे धर्मस्थाने श्रीऋषभ-चन्द्रप्रभ-श्रीवीराणामन्यतमजन्मकल्याणके ज्ञानकल्याणके वा विशुद्धदिगाकाशे दिने चन्द्रवले सर्वविकृतीर्विमुच्य पवित्रे चन्दनलिप्ते पटे श्रीसूरिमन्त्रयन्त्रं स्थापयित्वा वहिकापट्टे वा सुगन्धद्रव्यैः श्रीगौतममूर्तिः कनकमयसहस्रपत्रकमलोपर्यालिख्य तदधस्तात् आं क्रों ह्रीं श्रीं आलिख्य वक्ष्यमाणविधिना जापः प्रारभ्यः । तद्यथा—

भूमि-तनु-वसनशुद्धिः शरीररक्षादि च क्रमान्मन्त्रः ।
कृत्वाऽथाह्वानादिकमुद्राः पञ्च प्रकुर्वीत ॥१॥

त्रिधा पालितब्रह्मव्रतः स्तोकाम्भःस्नातः, शुचिश्वेताव्यङ्गवासाः, प्रतिक्रान्तेर्यापथः, शुचि-भूमौ पवित्रासनोपविष्टः सूरिः "ॐ भूरसीभूतधात्री सर्वभूतहिते भूमिशुद्धिं कुरु कुरु स्वाहा"

इत्युच्चारयन् सूरियन्त्रमात्मानं च परितो वासक्षेपं त्रिः कृत्वा भूमिशुद्धिं कुर्यात् ॥१॥
"ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतवाहिनि अमृतं श्रावय श्रावय हुं फट् स्वाहा" इत्युच्चारयन् आत्मनोऽभिमुखा वामहस्तकनिष्ठिकया संगृह्याधःकरौ परावर्त्येते इति गरुडमुद्रया यन्त्रं परितस्त्रिः कुण्डकल्पनाम् ॥२॥
"ॐ अमले विमले सर्वतीर्थजलेपः पः पां पां वां वां अशुचिः शुचिर्भवामि स्वाहा" इत्युच्चारयन् वासानञ्जलौ प्रक्षिप्य सर्वतीर्थाम्भांसि तत्र परिकल्प्य सर्वाङ्गस्पर्शेन त्रिः स्नानम् ॥३॥
"ॐ विद्युत्स्फुलिङ्गे महाविद्ये सर्वकल्मषं दह दह स्वाहा" इत्युच्चारयन् स्वस्तिकाकारीकृतोभयबाहुरुभयपाणिभ्यां भुजमध्यस्पर्शेन कल्मषदहनम् ॥४॥
"ॐ विमलाय विमलचित्ताय झ्वीं क्ष्वीं स्वाहा" इति दक्षिणकरस्पर्शेन त्रिर्वक्षःशुद्धिम् ॥५॥
ततः "क्षिपी तं पदोः पश्वेतं नाभौ । ॐ रक्तं हृदि । स्वानीलं मुखे । हा श्यामं भाले" इति पृथिव्यादिपञ्चभूतैः क्रमोत्क्रमाभ्यां करस्पर्शेन त्रिः सकलीकरणम् ॥६॥

"ॐ भाले कु वामांसे रु वामजानुसंधौ । कु वामांह्रौल्ले(रु) दक्षिणांह्रौ स्वा । वामजानुसंधौ हा" । वामांसे क्रमोत्क्रमाभ्यां वामकरस्पर्शेनात्मरक्षाम् ॥७॥
तेनैवाङ्गुष्ठपृष्ठे "ॐ" अङ्गुष्ठतले "ह्रां" । तर्जन्यां "ह्रीं" । मध्यमायां "ह्रूं" । सावित्र्यां "ह्रौं" । कनिष्ठायां "ह्रः" । ततः करद्वयेऽङ्गुष्ठादिष्वर्हदादिन्यासम् ॥८॥
"ॐ ह्रीं इन्द्राय स्वाहा" इत्यादि भणन् दशदिक्षु वासक्षेपं कुर्यात् ९ ।

ततः श्रीगौतमस्य पीठं चैत्यवृक्षच्छायास्थितं सपादपीठं सिंहासनं छत्रं चामरे विचिन्त्य वासानञ्जलौ क्षिप्त्वा "आं क्रों ह्रीं श्रीं भगवन् ! श्रीगौतम ! सर्वलब्धिसंपन्न ! अत्र सहस्रपत्रकनककमले एह्येहि संवौषट्" इत्युच्चार्य हृत्कमलात् स्फुरद्रश्मिमण्डलं द्वादशांशं नीत्वा तन्मयीभूय ब्रह्मस्थानेऽभ्युदितं श्रीगौतमं ध्यात्वा तस्मादादायावाहनमुद्रया स्थिरधीराऽऽह्वयेत् । सा च सावित्रीमूलन्यस्ताङ्गुष्ठा सवासाञ्जलिमुद्रा १ । "आं क्रों ह्रीं श्रीं भगवन् ! गौतम ! सर्वलब्धिसंपन्न ! अत्र कनककमले तिष्ठ तिष्ठ ठः ठः" इत्युच्चार्य सैव मुद्राऽधोमुखीति स्थापनमुद्रया पीठस्थसिंहासनोपरि कमले स्थापयेत् ॥२॥
"आं क्रों ह्रीं श्रीं भग० [० वन् ! श्रीगौतम ! सर्वलब्धिसंपन्न !] मम संनिहितो भव वषट्" इत्युच्चारयन् ऊर्ध्वाङ्गुष्ठे मुष्टी मील्येते इति सन्निधापनीमुद्रया सन्निधापयेत् ॥३॥
"आं क्रों० [० ह्रीं श्रीं] भग० [०वन् श्रीगौतम ! सर्वलब्धिसंपन्न !] पूजां यावदत्रैव स्थेयम्" इत्युच्चारयन् अभ्यन्तराङ्गुष्ठे मुष्टी मील्येते इति सन्निरोधिन्या निरुन्ध्यात् ॥४॥
"आं क्रों० [० ह्रीं श्रीं] भग० [०वन् ! श्रीगौतम ! सर्वलब्धिसंपन्न !] परेषामदृश्यो भव" इत्युच्चारयन् प्रसारिततर्जनीके मध्यमोपरि निवेशिताङ्गुष्ठे मुष्टी इत्यवगुण्ठिन्याऽवगुण्ठयेत् ॥५॥
ततः "अ आ, इ ई, उ ऊ, ए ऐ पूर्वादि दिक्चतुष्के, ओ औ ऊर्ध्वदिशि, अं अः अधोदिशि

नखच्छोटिका विघ्नत्रासाय देयाः ॥६॥

गौतमं परितोऽधोमुख्या सुधां वर्षन्त्या कामधेनुमुद्रया प्रदक्षिणात्रिकेण सजीवतापादनायामृतीकरणम् ॥७॥

"आं क्रों० [ह्रीं श्रीं] भग० [०वन् ! श्री गौतम ! सर्वलब्धिसंपन्न !] सुगन्धिपत्रगन्धादीन् गृहाण गृहाण नमः" इत्युच्चारयन् गौतमोपरि अञ्जलिना बुद्धिकल्पितगन्धादिपूजा ॥८॥

ततः स्वर्णाम्भोजस्थं श्रीगौतमः(मं) प्रातिहार्यार्पितं चतुर्विधः श्रीसंघः सदेवीका इन्द्रादयश्च नमन्तीति चिन्तयित्वा "आं क्रों ह्रीं श्रीं सर्वेऽपि श्रीसूरिमन्त्राधिष्ठायका अत्र आगच्छन्तु आगच्छन्तु संवौषट्" ।

अत्र तेषां स्वरूपध्यानम्, तद्यथा—

पूर्वस्यां विद्यापीठप्रतिष्ठिता सरस्वती । दक्षिणस्यां मानुषोत्तरपर्वतनिवासिनी सहस्रभुजा त्रिभुवनस्वामिनी । पश्चिमायां पद्महृदान्तःपद्मोपविष्टा चतुर्भुजा विजया–जया–जयन्ती–नन्दा–भद्राऽन्विता स्वर्णाभरणभूषिता पुरःश्रेणीस्थनवनिधाना श्रीदेवता । उत्तरस्यां षोडशसहस्रयक्षपतिर्विंशतिभुजो गणिपिटकयक्षराजः । पूर्वादि ४ दिक्षु ६४ इन्द्राः । पूर्वादि ४ दिक्षु १६ विद्यादेव्यः । एवं २४ यक्षाः, २४ यक्षिण्यः, आवाहनमुद्रया पूर्ववत् । हृत्पद्मादाहूवयेत् । ततोऽत्रापि "आं क्रों ०[ह्रीं श्रीं] सर्वेऽपि श्रीसूरि० [०मन्त्राधिष्ठायका अत्र आगच्छन्तु आगच्छन्तु संवौषट्]" इत्यादि भणनपूर्वं स्थापन्यादिमुद्राभिस्तेषां प्रागेव स्थापनादि । नखच्छोटिकाः । अमृतीकरणम् । गन्धादिपूजा । ततः "संवत् अमुकवर्षे अमुकमासे तिथि–वारेऽहममुकसूरिशिष्योऽमुकसिद्धयेऽमुकजापमारभे" इति ध्यात्वा "नमः सद्गुरुभ्यः" इत्युक्त्वा चन्द्रेण राजसरूपं रक्तवायुं सूर्येण द्वेषरूपं कृष्णवायुं रेचयित्वा पुनः शशिना सत्त्वगुणरूपं श्वेतवायुमाकृष्य नाभौ च संस्थाप्य प्रसन्नास्यः सुश्लिष्टौष्ठयुगो दन्तैर्दन्तानस्पृशन् नासायां गौतममूर्तौ वा न्यस्तदृष्टिर्जिह्वामप्यचालयन्नन्तर्जल्पाकारमनाहतनादरूपं वा स्मरणमारभेत । तच्चैवम्—सर्वत्र लब्धिपदानि पीठानि च ज्ञानधनार्थे श्रीपूर्वाणि, वश्याद्यर्थे ह्रीं पूर्वाणि, शान्तकादौ ॐ पूर्वाणि, कर्मक्षयार्थं परमेष्ठिमुद्रया निर्मुद्रं वा ॐ ह्रीं श्रीं-रहितानि केवलान्येव स्मरेत् ।

द्विवारं स्नानं सुगन्धिविलेपनम् । त्रिधा शुद्धं शीलम् । प्रतिक्रान्ति प्रतिलेखनां चैत्यवन्दनां च विनाऽन्यद्व्याख्या–पठन–पाठनादि त्याज्यम् । सर्वविकृतीर्मुक्त्वा लक्षमानः करजापः कार्यः । जापभेदाः पुनरग्रे वक्ष्यन्ते ।

एषा पूर्वसेवोच्यते ।

अस्यां च कृतायां निष्पापः सातिशयश्च स्यात् । लक्षजापान्तर्यथाशक्तिस्मरणां कृत्वोत्तिष्ठासुर्विसर्जनं कुर्यात्, यथा– दक्षिणकरेण मुष्टिं बद्ध्वा तर्जनी–मध्यमे प्रसार्य इत्यस्त्रमुद्रया

गौतमस्यासनं मनाक् चालयित्वा,

ॐ आज्ञाहीनं क्रियाहीनं मन्त्रहीनं च यत् कृतम् ।
तत् सर्वं कृपया देव ! क्षमस्व परमेश्वर ! ॥१॥

इति पठित्वा "ॐ ह्रीं नमोऽस्तु ते भगवन् ! पुनरागमनाय स्वस्थानं गच्छ गच्छ"। यः इति भणन् दक्षिणकरं प्रसार्य हेमाम्भोजस्थगौतमस्योपरि संहारेण भ्रमयित्वा कनिष्ठादि सर्वाङ्गुलीनां संकोचते(ने) नाङ्गुष्ठमूलानयनमिति विसर्जनमुद्रया विसृज्य श्रीगौतमं ब्रह्मरन्ध्रे नीत्वा सुषुम्नया हृत्पद्मे पूरकेण स्थापयेत् । यतस्तस्मादाहृय स्थापितोऽभूत् । ततोऽस्त्रमुद्रया क्षोभणं कृत्वा,

ॐ आज्ञाहीनं०[०क्रियाहीनं० मन्त्रहीनं च यत् कृतम्] ।
तत् सर्वं कृपया देव ! क्षमस्व परमेश्वर ! ॥

इत्युच्चार्य "ॐ ह्रीं सर्वेऽपि सूरिमन्त्राधिष्ठायकाः पुनरागमनाय स्वस्थानं गच्छन्तु गच्छन्तु" यः इति पठन् विसर्जनमुद्रया सूरिमन्त्राधिष्ठायकान् प्रागिव ब्रह्मद्वारेण हृत्पद्मे बहिर्वद् गौतमं परितः सरस्वत्यादीन् न्यसेत् । ततः "पढमपए सुनिचित्ता" इति स्तुतिपाठः । ततोऽशनादि कार्याणि कृत्वा पुनः स्मरणाप्रारम्भे पूर्ववद् भूशुद्ध्यादिविसर्जने च क्षोभणादि कुर्यात् ।

अथोत्तरसेवोच्यते—

तत्राद्यपीठं विद्यापीठं नाम । तच्च गच्छेशमन्त्रपटेऽष्टादशलब्धिपद्यादि पर्यन्तः—स्वाहान्तं पञ्चनवत्यधिकशताक्षरमात्रम्(१९५) सामान्यसूरिमन्त्रपटे तु षोडशलब्धिपद्यादि–पर्यन्तञ्च स्वाहान्तं चतुःसप्तत्यधिकशताक्षरमात्रम् (१७४)। अस्याधिष्ठात्री सरस्वती, तस्याः पूजास्तुती कुर्यात् ।

आराधना-तपोविधिस्त्वयम्—

उ नि आ नि आ नि आ नि उ इगपाणिगपणेगपाणिगइगमेगं ।
चिंतण-पढणं विकहाचाओऽहोरत्तणु ठाणं ॥१॥

ओ (उ) १ नि ५ आ १ नि ५ आ १ नि ५ आ १ नि १ उ १–एवं दिन २१ कोट्यंशतपः । अनेन तपसा महाफलम्, अन्यथाऽल्पफलम् । पद्मासनस्थः पूर्वामुख उत्तरामुखो वा परमेष्ठिमुद्रया गरुडमुद्रया वा सहस्रद्वादशकं जपेत् । श्वेतध्यानेन सामान्यतः सर्वसिद्धिकरम् । उक्तं च—

एकविंशत्यहान्यर्कसहस्र १२ प्रमितो जपः ।
कोट्यंशतपसा शान्तिलाभ-वाग्-बुद्धिसिद्धये ॥१॥

परमेष्ठि-गरुडमुद्रायुगेन जापोऽस्य देवतेन्दुनिभा ।
पुस्तकमरायं मुक्तास्रजं वरं तन्वती भुजचतुष्के ॥२॥
हंसेऽम्बुजे निविष्टा वाग्बीजेऽथान्तरात्महंसे वा ।
ब्राह्मीव पुण्डरीकं सरस्वती गोतमं नमति ॥३॥
गोतमनन्ता(न्त्या ?) देव्या पुत्रदृशा वीक्षितः प्रदत्तवरः ।
पञ्चमहाव्रतनिष्ठो युगप्रधानागमो भवति ॥४॥

तथा श्रीगच्छेशा अप्येवमेव पूर्वं सामान्य श्रीसूरिमन्त्रं साधयित्वैकविंशति(२१)वर्णमात्र स्वाहान्तं लब्धिपदद्वयं १२ सहस्राणि जपेत् । अक्षीणकोशत्वं सर्वत्राप्रहतयशस्त्वं च स्यात् । तथा क्षीराश्रवादि लब्धिपदानि षट्, सहस्राणि दश(१०) श्वेतध्यानेन जप्यन्ते श्वेतजपमालया षष्ठलब्धिपदान्ते च,

"जमियं सारस्सयं पउंजामि तं मे सारस्सयं पसिज्झउ स्वाहा" इति वाच्यं सिद्ध-सारस्वतम् । प्रथमपीठे १२ सहस्रजापादनु होमः कार्यः । तद्विधिश्चायम्—
हस्तमात्रं चतुरस्रं कुण्डं भौमं हसन्तीमयं वा कृत्वाऽरणेर्वा भानुकान्ताद् वा तत्राग्निं प्रज्वाल्य मन्त्रेण प्रतिष्ठापयेत् । स चासौ "मनोर्जूतिर्जुषतास्य ह्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञाग्निं समिमं दधातु विश्वे देवाः स इह मा दयन्तामों (म ओं) प्रतिष्ठ" । वार ७ भणित्वाऽक्षता ज्वालाकरालेऽग्नौ क्षेप्याः । अग्नेश्च सप्तजिह्वाः स्मरेत् । तास्वीशान-जिह्वायां मध्यजिह्वायां वा जुहुयात् । सप्तघृताहुतयो विद्यापीठोच्चारणेन अथवा दशांशेन होमः । सचैवम्—

गरुडाख्यतण्डुलघृतैकवर्णश्वेतगोपयःखण्डमयीः १२ शतमाना गुटिकाः कृत्वा विद्यापीठोच्चारपूर्वं जुहुयात् । पश्चात् केषाञ्चित् फलदुकूलादीष्टवस्तूनां त्रिभिः कत्यपि होमाः । ततः पूर्णाहुत्यर्थं घृतभृतनालिकेरस्य । तदा चेदं वाच्यम्—

"इमां पूर्णाहुतिं भगवति ! सरस्वति ! प्रतीच्छ मम कामितं कुरु कुरु स्वाहा" । यावन्नालिकेरं सर्वं तावत् प्रतीक्ष्यम् । अग्निं च महाघृतप्लवेन दीपयेत्, 'घृतहीनं दहेद् राष्ट्रम्' इति वचनात् । तद् भस्म संगृह्य स्वयं धार्यमिष्टेभ्यो वाऽल्पं देयम्, शान्ति-तुष्टिपुष्टिहेतु । अनयैव रीत्या महाविद्योपविद्यापीठयोरपि होमः । नवरमाहुति-होमौ स्व-स्वा-धिष्ठायिकादेवतानामादाय स्व-स्व-मन्त्रेणैव । एवं च तपो-जाप-होमैराराधिते प्रथमपीठे सूरिः सरस्वती १, रोगापहारिणी २, विषापहारिणी ३, बन्धमोक्षिणी ४, श्रीसंपादिनी ५, परविद्याच्छेदिनी ६, दोषनाशिनी ७, अशिवोपशमनी ८ । एता अष्टमहासिद्धीः स्वस्य परस्यापि साधयति । कोऽर्थो यदा स्वस्यान्यस्य वा सारस्वतमुत्पादयितुं रोग-विषं हन्तुं

बन्धं छेत्तुं श्रियं कर्तुं कार्मणादि हन्तुं दोषं नाशयितुं मारिं शमयितुं भौमादि तदा प्रथमपीठं स्मरेत्। स्वल्पस्मरणेनापि सिद्धयति। श्रीमानतुङ्गसूरिभिर्गणविद्याविचारविद्भिः 'यैः शान्त-रागं' इत्यादि 'जलभारनम्रैः' इत्यन्तं काव्याष्टकं कृतम्। एतत् काव्याष्टकं 'ज्ञानं यथा त्वयि' इति नवमकाव्ययुतं प्रातः प्रत्यहं यः पठेत् स सारस्वताधिष्ठायिकाप्रसादेन पदं च प्राप्नोति।

इत्याद्यपीठसाधनाविधिः ॥

द्वितीयपीठे—ॐ नमो भगवओ इत्यादि विज्जा यावत्, अक्षर ३३ एवं बाहुबलिविद्या स्वर्णार्चयेत्। ततो वग्गु वग्गु इत्यादि महुमहुरे यावत् वर्णाः ७२ गौतमस्वामिविद्या। तओ हिलि हिलि इत्यादि आयरियकालि यावत् वर्णाः ३० जयादि विद्या। एवं सर्वाक्षर १३५। अस्य पीठस्याधिष्ठात्री मानुषोत्तरशिखरवासिनी सहस्रभुजा त्रिभुवनस्वामिनी।

आराधना-तपोविधिश्चायम्—

उ नि आ नि आ नि उ झीणानिद्दउत्तुणदुग्गपुत्तसायरगो ।
भविसिल्लो जिणयव-यत्त-मंतउसयं चउत्थगो ॥

एवं दिन १४ मुख्यकल्पेषु तु उपवासो १, एकाशन १, आचाम्लनिर्विकृतिक ३, आचाम्लमनु-क्रमम्(४)।(१) आचाम्लपरस्युगम्(२), उपवासव्यतिक्रमः १३ दिवसाः उत्कृष्टं प्रमाणम्। जिणयवत्तचउत्ति—लोगस(स्स) ४० चिन्त्या कायोत्सर्गे गन्धाक्षतपरत्रेण च नित्यं चिन्त्यमुत्सर्गे। एवं तपः कुर्वन् प्रथमं बाहुबलिविद्यां श्वेतध्यानेन सहस्र १० स्मरेत्। होमः प्रथमपीठवदत्रापि। उत्सर्गेन कार्ये ऐर्यापथिकीं प्रतिक्रम्य गन्धाक्षतमुद्राक्षितं कुर्यात् भुक्त्वा कायो-त्सर्गेऽष्टोत्तरशतं स्मरेत्। शुभे बाहू ऊर्ध्वमुत्तिष्ठतः, अशुभे त्वधः पश्चान्मुखं संनिश्चलितयो मिलतः। वादाद्यवस्थाः १०८ जापेऽपराजितत्वं प्रत्यर्थिकोपशान्तिः। अन्यां च जलनामानां शकुनोपशकुन्यादि सत्यमेव स्यात्। अत्र मन्त्रविशेषो लिख्यते—

"ॐ ह्रीँ बाहुबलि-महाबाहुबलिपदात्तु गिरिमहागिरिः ।
वीरादिबाहुबल्यं स्वाहा"[1] मन्त्रः सितदिग्दृष्टे ॥१॥
आलिख्य सुगन्धिदलैः मर्त्यसहस्रैस्तु जातिकुसुमानाम् ।
जपतः प्रश्ने दक्षिणबाहुस्फुरणे शुभं प्रष्टुः ॥२॥
आलिख्य पादुके द्वे पतो वदने सचन्द्रचन्दनतः ।
यत्नेष्टं बाहुबलेः सितपद्मपुष्पैः समभ्यर्च्य ॥३॥

---

१ ॐ ह्रीं बाहुबलिमहाबाहुबलिगिरिमहागिरिवीरबाहुबल्यै स्वाहा ॥

उत्सर्गे पञ्चशतीं "नुँ किरि किरि लम्बबाहुमत्र नमः" ।
जप्त्वा शीर्षे कृत्वा शयने च शुभाशुभादेशः ॥४॥

बाहुबलीविद्यासिद्धेरनु वाग्वादिसौभाग्यविद्यां पीतध्यानेन सौभाग्यमुद्रया षोडश (१६)सहस्राणि–[१६०००] जपेत्। जपमालाऽपि हैमी कृमिजादिमयी वा पीता, होमोऽग्रेतन एव। एकत्रापि कृतेन होमेन विद्याद्वयसिद्धिः। अनया कृपणोऽपि दाता राजकुलादौ सर्वत्रादेयवचनता च तदनु हिलि हिलि इत्यादि जयादिविद्यां पीतध्यानेन गरुडमुद्रया १२ सहस्राणि जपेत्। होमोऽग्रेतन एव। अनया जयविजया जितत्वापराजितत्वानि स्युः। जयः स्वदेशे विजयः परदेशे। अजितत्वमरिषु अपराजित्वं परवादिषु विद्यात्रिकेण॥ [इति] द्वितीयं पीठम्॥ २ तृतीयपीठे–इरियाए इत्यादि कालि–महाकालि यावदक्षर–३५। एतदधिष्ठात्री च पउमदहपउमनिलया इत्यादि गाथोक्तरूपाः विजया–जया–जयन्ती–नन्दा–भद्रान्विता श्रीदेवी। तपोविधिरेयम्—

उ नि आ नि आ नि उ इगट्ठपंचसत्तेगदुइग तइयपए।
उ१ नि८ आ५ नि७ आ१ नि२ उ१–एवं दिन २५।

अत्रापि लोगस(स्स) ४० कायोत्सर्गे १०८ मन्त्रश्च चिन्त्यः प्रत्यहम्। एवं प्रोक्ते तपः कुर्वन् सितध्यानेन सहस्राणि १२ जपेत्। सम्राडपि वश्यः, तथासंदिग्धार्थनिर्श्लेष्टस्वप्नविषये उपोष्य सितध्यानेन षोडशसहस्रजापे सारस्वतमव्यभिचारि तथा नित्यं १०८ स्मरणेन शिष्यलब्धिः। शापोऽनुग्रहशक्तिरादेयगीस्ता पूर्वगुरुसिद्धेरल्पबहुत्वेनाच्छिन्नता च। तथैतज्जपिताऽक्षतानां शीर्षे गृहे च क्षेपे ऋद्धिः स्यादतः श्रावकाणां शिष्याणां च मौलौ वासक्षेपोऽनेनैव कार्यः विशेषतो योगारम्भे।

[इति] तृतीयपीठम्॥ ३

चतुर्थपीठे—इरि इरि कालि इत्यादि आयरिय आयरियकालि यावदक्षर ४६॥

अस्याधिष्ठाता—

अणपण्णपन्निपइट्टो वीसभुओ मंतपीढहिट्ठाया।
सोलसहं सहस्स जक्खाण सामिओ जयइ गणिपिडगो॥

तपोविधिरेयम्—

उ नि आ उ इगपणेगिगतुरिए पुव्वो विही समग्गो वि।
उ१ नि५ आ१ उ१ एवं दिन ८।

अत्र परमेष्ठिमुद्रया जापः जिनध्यानेन सहस्रद्वादश (१२)—[१२०००]। होमो नास्ति।

“यदधिष्ठायको मन्त्रो न होमस्तत्र यत्र तु।
अधिष्ठात्री मन्त्राणां सा विद्या होमसंयुता॥”

इति वचनात्।

अनेनैकेनैव पूर्वपीठचतुष्कोक्तं सर्वं सिध्यति। [१]मन्त्रपीठे हि भगवतो [illegible]निशयप्रातिहार्याष्टकरूपम्। अत्र देवानां देवेन्द्राणां न्यासः। यथा ह्रीँ ह्रीँ [illegible] ज्योतिष्केन्द्राणाम्, गिरि गिरीति भवनपतीन्द्राणाम्, पिरि पिरीति व्यन्तरेन्द्राणाम्, [illegible] वैमानिकेन्द्राणाम्, हिरि हिरीत्यनल्प[illegible]मनुष्य[illegible]नाम्, [illegible] लौकान्तिकानाम्। कालः सातिशयक्रियानिष्पादनलक्षणः। सोऽत्रोक्तः [२]तीर्थकृतां [illegible]कोनविंशत्यतिशयप्रातिहार्याष्टकोपालना। [illegible] [illegible]। अप्रतिहतशासनताऽविच्छेदेन तीर्थकृद्भिर्निर्दिष्ट[illegible] [illegible]वर्णकर्णोदु[illegible]मिथ्यात्वानभिभूतत्वं [illegible] [illegible]निरुक्तिदुर्भिक्षकान्तारोल्लङ्घनं सिद्धान्तार्थ[illegible] [illegible]न्यापन्ना एताः सातिशयक्रियान्येषाम्[३] ॥

[इति] चतुर्थपीठम् ॥

पञ्चमपीठे—इरि मेरु इत्यादि स्वाहान्ताक्षर ३२। अधिष्ठातारश्च [illegible] [illegible]। षोडश विद्यादेव्यः (१६)। २४ यक्षाः। २४ शासनदेव्यः।

तपोविधिरेवम्—

मोणेण सुगहिअस्स व्विय गोयमतवेण य निसंको।
झाणं झियअट्ठपञ्चसंतप्प सोलसावासा (१६) ॥१॥

आचाम्लनिरन्तरम्। अस्य लक्षजापात् गौतमतुल्यः स्यात्। [illegible] सिध्यन्ति। अयं मन्त्रराजः पूर्वोक्तानां पीठानां स्वामी, मेरुकल्पेन आर्हन्त्यम्। अतो [illegible]—वीर्यानन्दसिद्धिर्ध्यातुर्नित्यस्मरणेन स्यात्। मन्त्रराजस्य मोक्षफलत्वात्। नित्यं [illegible] १०८ [illegible]थं च [illegible] [illegible]ध्यानेन [illegible] [illegible]ध्यानेन सार्धं सदा १०८ ध्येयः। महानैष्ठिकस्य मन्त्रराजस्त्रिशो मन्त्रसहस्रं विद्यासहस्रं च

१ मन्त्रपीठे चतुर्थपीठस्य। २ [illegible] तीर्थकृतां [illegible]—[illegible]—[illegible]। ८— [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] ॥ ३ [illegible] [illegible] [illegible] [illegible] [illegible]: सातिशयक्रिया [illegible] ॥

धूम्रं च वायुमण्डलतत्त्वगमुच्चाटनं सुहृद्द्वेषम् ।
कृष्णं व्योमान्तरगं मृत्युं कुर्वीत न प्रयुञ्जीत ॥१४॥
ध्येयः सातिशयजिनो गणधरदेव्यादिमन्त्रवर्णा वा ।
ध्येयेन प्राणानामैक्यं सर्वत्रगं तदेकत्वम् ॥१५॥
प्रविशति पूरक-कुम्भकपवने चान्द्रेऽर्द्धरात्रपूर्वान्हे(ण्हे) ।
वाच्योऽक्षरः शुभार्थे व्यस्ते व्यस्तार्थके इदं तत्त्वम् ॥१६॥
षट्कोणाकृतिदेहे विन्यस्या अक्षरास्तथा स्वान्तम् ।
तत्तद्वर्णाकारं कृत्वा ध्यायति स सिद्धिपदम् ॥१७॥
यत् पूर्वं नाभेय[ः] श्लोकत्रिंशतानि पुण्डरीकाय ।
गणभृन्मन्त्रं प्रददौ विद्यासिद्धः स मुक्तश्च ॥१८॥
[1]चन्द्रप्रभान्तमेवं तीर्थानुच्छेदतो बभूवास्य ।
एकैव वाचनातो भिन्ना भिन्ना तु वीरान्तम् ॥१९॥
श्रीगौतमाय मन्त्रं वर्णानेकाधिकविंशतिशतानि ।
स्वामी ददौ तदाज्ञावश्यः श्रीगौतमोऽप्येनम् ॥२०॥
द्वाविंशतश्लोकमितं चक्रे कालेन हीनमानममुम् ।
अध्युष्टश्लोकमितं पठिता श्रीदुःप्रसहसूरिः ॥२१॥
श्रीमत्सुधर्मगणभृत्संतानेऽप्येक एव मन्त्र इति ।
आराधि गौतमश्चेत् सर्वेऽप्याराधिता गुरवः ॥२२॥

॥ त्रिभिर्विशेषकम् ॥

अथाष्टविद्याः—

१सरस्वती २रोगापहारिणी ३विषापहारिणी ४बन्धमोक्षिणी ५आराधकश्रीसंपादिनी ६परविद्योच्छेदिनी ७दोषनिर्नाशिनी ८अशिवोपशमिनी ।

'जं जं विज्जं पउंजामि सा मे विज्जा पसिज्जउ' भव्वसत्ताराहगविसये अयं भावार्थः ॥ जातावेकवचनम् । आसां पदविभागः । प्रणव-नमोयुक्तानि पदानि सर्वाणि ईप्स्टं कार्यं जनयन्ति । प्रणवं विना नमो इति मोक्षबीजम् । जिन-अवध्यादयो ध्येयाः ।

---

१ अतः श्रीचन्द्रप्रभजिनात् ॥

"चउदसपुव्वीणं पयाणुसारीणं एगारसंगीणं उज्जुमईणं विउलमईणं एतेभिरित्यादि सारस्सयं मे पसिज्जउ स्वाहा" अनया रीत्या समस्तकार्यमुच्चारणीयम् ॥ १ ॥

अमोसहिलद्धीणं विप्पोसहिलद्धीणं खेलोसहिलद्धीणं सव्वोसहिलद्धीणं-भव्यानां कुष्टादिरोगे उपस्थितेऽनया शरीरं स्पृश्यते ताम्बूलं कलापानीयं अभिमन्त्र्य दीयते। इमां श्रीखण्डेनालिख्य सुरभिद्रव्यैः पूजयित्वा कांस्यपात्रे दुग्धेन प्रक्षाल्य पाय्यते। एतान्यक्षराणि आराधकोपरि दुग्धममृतं वा वर्षन्तीति ध्यानं महारोगे नान्यत्र रोगहरी रोगहरी ॥ २ ॥

आसीविसलद्धीणं खीरासवलद्धीणं महुआसवलद्धीणं अमियासवलद्धीणं-एषा विषापहारिणी, अनया शरीरस्पर्शादि पूर्वरीत्या पूर्वोक्तध्यानम् ॥ ३

जिन-अवधि,-परमावधि,-अनन्तावधि केवलित्रयम्। एतानि बन्धमोक्षिणी। अत्र पूर्वरीत्या ध्यानं न स्पर्शनादि। एतेषां श्रीखण्डलिखितानां अधोभागे बद्धनामालिख्य निरन्तरं पूजाध्यानं च, कार्ये महतां महाबन्धमोक्षे नान्यत्र ॥ ४

बीयबुद्धीणं कुट्ठबुद्धीणं संभिन्नसोयाणं अक्खीणमहाणसलद्धीणं एतानि श्रीसंपादिन्यां ध्यानं पूर्वरीत्या निरन्तरम्। महतां सुस्थाननिवेशितश्रीणामलाभोपद्रवे प्रयोजनीयम् ॥ ५

उग्गतवचरणचारीणं दित्ततवाणं तत्ततवाणं पडियं मा पडिवन्नाणं-एतानि परविद्याच्छेदिन्यां ध्यानं वज्रपञ्जरमध्यस्थोऽहम् ॥ ६

जंघाविज्जाचारणाणं वेउव्वियइड्ढिपत्ताणं आगासगामिणं-एतानि दोषनिर्नाशिन्यां ध्यानं सुरासुरपरिस्कृ(ष्कृ)तः सर्वव्यापी सर्वदिग्गामी। अहं एतेषु ध्यायमानेषु क्षुद्रदोषः समीपस्थो न भवति। महतां महादोषे प्रयोजनीयम् ॥ ७

१मणपज्जवनाणीणं २सीयलेसाणं ३तेउलेसाणं ४आसीविसभावणाणं ५दिट्ठीविसभावणाणं६चारणसमणभावणाणं ७महासमणभावणाणं ८ तेयग्गिनिसग्गाणं नमोयुक्तसविशेषणप्रत्येकप्रातिहार्यस्य पदानि। सप्रणवनमोयुक्तद्वात्रिंशत्संख्यस्तुतिपदानि च अशिवोपशमिन्याम्, यथा- १जिण-२ओहि-३परमोहि-४अणंतोहि-५अणंताणंतोहि-६केवलि-७भवत्थकेवलि-८अभवत्थकेवलि-९उज्जुमइ-१०विउलमइ-११वेउव्वियलद्धि-१२सव्वलद्धि-१३पण्हासमण-१४ जंघाचारण-१५ विज्जासिद्ध-१६ आगासगामि-१७ आमोसहि-१८विप्पोसहि-१९खेलोसहि-२०जल्लोसहि-२१सव्वोसहि-२२ आसीविस-२३ अट्ठंगनिमित्तधारय-२४वयणविसत्तलेस-२५ सीयलेस-२६ चउदसपुव्वि-२७ दसपुव्वि-२८ एगारसंगि-२९ संभिन्नसोय-३० दुवालसंगी-३१सव्वसिद्ध-३२उग्गतवचरणचारित्तश्रीष(ख)ण्डविलिप्तकांस्यपात्रे आलिखत (खेत) सचतुर्द्वारप्राकारत्रयरूपे समवसरणे 'ॐ अर्हं श्रीयुगादिनाथाय स्वाहा' मध्ये इत्यादि लिखेत्। तदधोभागे आर्त्तस्य नाम। ततः पूर्वस्यां 'विनीतायां राज्यं करोति' इत्यालेख्यम्। उत्तरस्यां 'पुत्राणां राज्यं ददाति, व्रतं गृह्णाति इक्षुरसेन श्रेयांसः प्रीणयति' इति लिखेत्।

दक्षिणस्यां 'मौनी विहरति'। पश्चिमायां 'उत्पन्नकेवलो भव्यान् प्रबोधयति'। ततो निखिल-मन्त्रस्य करेण जापः १०८। सुरभिद्रव्यैः सितकुसुमैः पूजा कार्या। पूर्वतः ततो भक्तामरस्तवेन स्तवनीयः। ततश्चैत्यवन्दनां विधाय शान्तिं भणित्वा श्रीष(ख)ण्डसंपृक्तजलेन अष्टोत्तरकलश-शतेन स्नात्रं क्रियते। तेन स्नात्रेणार्त्तोऽभिषिच्यते। यन्मण्डले लिखितं तदेव ध्यानम्। अथवा युगादिनाथजन्मकल्याणकम्। याद्दग्रीत्या कल्पे। एतद् वादे विवादे रणे राजकुले राज्ञि प्रत्यनीके नित्योपद्रवे विघटिते कार्ये महति रोगे चिरदोषे चिरदोषग्रस्तेऽन्यस्मिन् विषमाप-त्स्थाने महतां सम्यक्त्वशालिनां स्थिरधर्मोणं(णां) आराधितरत्नत्रयाणां पदस्थानां प्रयोजनीयं नान्येषाम्। अथवा 'यैः शान्तरागरुचिभिः' इत्यादिको 'ज्ञानं यथा त्वयि विभाति' एतदन्त-स्तवो नित्यं भणनीयः। सर्वेषामात्मनः सदा शान्तिकम्, अयमेव श्रीपुण्डरीकादेशोऽतिस्पष्टः। गणधरविद्यागर्भितं वृत्ताष्टकमिदं प्रातरेव भणनीयम्, नान्यत्र वेलायाम्। अतः सर्वकार्य-प्रसाधकं विद्यापीठम् ॥ [८]

अथ स्मरणाविधिः—

स्तोकाम्भःस्नातोऽव्यङ्गवासा ऐर्यापथिकीं प्रतिक्रम्य शुचिविविक्तदेशे प्राग्मुख उत्तरा-मुखो वा पद्मासनस्थः सूरिः पुरः समवसरणं मुक्त्वा सूरिमन्त्रसाधनाप्रारम्भ[ः] प्रोक्तरीत्या भूमिशुद्धयादि नवाधिकारान् कृत्वा, 'उँ उँ (ह्रीं) नमः' इति मन्त्रेण संवृतसमवसरणोपरि त्रिर्वासक्षेपं विधाय समवसरणं छोटयेत्। ततः सूरिमन्त्रपटं वासादिनाऽभ्यर्च्य पूर्वोक्तरीत्यैव 'आं क्रौं ह्रीं श्रीं' इत्यादिना श्रीगौतमं समाहूय मुद्रापञ्चकेन मन्त्रपटे स्थापयित्वा नखच्छोटि-कामृतीकरणगन्धार्चाः कृत्वा स्वर्णाम्भोजस्थं सप्रातिहार्यं श्रीगौतमं ध्यात्वा मुद्रापञ्चकेन सूरि-मन्त्राधिष्ठायकान् पूर्वादिदिक्षु निवेश्य नखच्छोटिकामृतीकरणगन्धार्चाः कृत्वा 'नमः सद्-गुरुभ्यः' इत्युच्चार्य १ सौभाग्य– २ परमेष्ठि– ३ प्रवचन– ४ सुरभि– ५ अञ्जलिमुद्राभिः पञ्चपीठमयं संपूर्णसूरिमन्त्रं जपेत्। आम्नायोऽत्र—

आद्या त्र्यक्षोभे सुरभिः शान्ते[1] तृतीयका ज्ञाने।

परमेष्ठी सर्वार्था अञ्जलिमुद्रात्मसेवायै ॥

अतः सौभाग्यमुद्रया सर्वाणि लब्धिपदानि पञ्चपीठानि च ह्रीं पूर्वाणि स्वाहान्तानि तु पीठानि ।१। परमेष्ठिमु० (मुद्रा)–उँ पूर्वाणि स्वाहान्तानि ।२। प्रवचनमुद्रा–श्रींपूर्वाणि स्वाहा-न्तानि ।३। सुरभिमुद्रा–अञ्जलिमुद्रा–या च यथावस्थितम्। श्रीअञ्चलगच्छेशश्रीआर्यरक्षित-सूरिक्रमागतं २७८ अक्षरमानं सूरिमन्त्रं जपेत्। ततः पूर्वोक्तयुक्त्या विसर्जनं कृत्वा स्तुतिं पठेत्। सा चैवम्—

---

१ मुद्रा। २ शान्ते तुष्टि-पुष्टिप्रभृतिकार्ये ॥

स्तुतिः ।

पढमपए सुनिविट्ठा विज्जाए सूरिणो गुणनिहिस्स ।
गोयमपयभत्तिजुया सरस्सई मह सुहं देउ ॥ १ ॥
दुइयपीढे निविट्ठा इमाए विज्जाए निरुवममहप्पा ।
तिहुयणसामिणिनामा सहस्सभुयसंजुया संती ॥ २ ॥
सिरिगोयमपयकमलं झायंती माणुसुत्तरनगस्स ।
सिहरम्मि ठिया निच्चं संघस्स य मह सुहं देउ ॥ ३ ॥
पउमदहपउमनिलया चउसट्ठिसुराहिवाण महमहणी ।
सव्वंगभूसणधरा पणमंती गोयममुणिंदं ॥ ४ ॥
विजया-जया-जयंती-नंदा-भद्दासमन्निया तइए ।
विज्जापए निविट्ठा सिरिसिरिदेवी सुहं देउ ॥ ५ ॥
विज्जाचउत्थपीढे निवेसिओ गोयमस्स अभिरूइओ ।
गणिपिडगजक्खराओ अणपणपन्नीकयपइट्ठो ॥ ६ ॥
सोलससहस्सजक्खाण सामिओ अतुलियबलो उ वीसभुओ ।
जिणसासणपडणीयं महरिउवग्गं निवारेओ ॥ ७ ॥
सोहम्मकप्पवासी एरावणवाहणो उ वज्जकरो ।
सेवइ तियसाहिवई सगोयमं मंतवररायं ॥ ८ ॥
ईसाणकप्पवासी सूलकरो वसहसंठिओ निच्चं ।
सेवइ तियसाहिवइ सगोयमं मंतवररायं ॥ ९ ॥
इयकप्पे निवासी सिरिसमणो नामओ य चक्ककरो ।
सेवइ तियसाहिवई सगोयमं मंतवररायं ॥ १० ॥
सिरिबंभलोयवासी सोमणसो नामओ य बहुसत्थो ।
सेवइ तियसाहिवई सगोयमं मंतवररायं ॥ ११ ॥
अट्ठकुलनागराया सहसफडो सिरिनिविट्ठकरसुउलो ।
सेवइ धरणिंदो वि य सगोयमं मंतवररायं ॥ १२ ॥

प्रसङ्गेन सिद्धयति । तथा कुङ्कुम-चन्दन-कस्तूरीभिः कांस्यपात्रे मन्त्रराजं विलिख्य दिन २१ पूजयेत् । प्रत्यहं १०८ जापश्च क्षुद्रदेवतकृतरोगोपद्रवनिवृत्तिः, सर्वकार्यनिर्विघ्नता च ॥

[इति] पञ्चमपीठम् ॥

इह च प्रथमादिपीठेषु स्मर्यमाणेषु क्रमाद् मतिश्रुता-ऽवधि-मनःपर्याय-केवलज्ञाना-न्युन्मीलन्तीति वृद्धाः । तथा [1]पञ्चप्रस्थानमयोऽप्येष श्रीसूरिमन्त्रः कर्मक्षयार्थं परमेष्ठिमुद्रया शुक्लध्यानेन, सौभाग्यार्थं योनिमुद्रया रक्तध्यानेन, वश्यार्थं सौभाग्यमुद्रयोस्तप्तहेमध्यानेन । रिपुक्षयार्थं चक्रमुद्रया कृष्णध्यानेन त्रिसन्ध्यं ध्येयः । यदा मरकरोगदोषादिकं पुनः पुनरुत्पन्नं नाशयितुमिष्यते, अभूतस्य चानुत्पत्तिं तदा चन्दनेन सचन्द्रेण स्थालं लिप्त्वा छायाशुष्कं कृत्वा जातिलेखन्या द्वादशप्रतोलीप्राकारत्रयादिकं यथाऽऽगमं समवसरणमुत्कीर्य तदन्तर्नाभेयमूर्ति-श्चैत्यद्रुमादि प्रातिहार्ययुग् लिख्यते । तदासनाधः सकुटुम्बोऽमुकोऽमुकग्रामोऽमुकक्षेत्रादि यथाकार्यमक्षराण्युत्कीर्यन्ते । तत्रा(त्र) स्थाले १०८ पुष्पैः सर्वसूरिमन्त्रं जपेत् । ततः स्थालं वहत्कुण्डिकादौ त्रिगढीउपरि धृत्वा मन्त्रं भणद्भिरष्टोत्तरशत(१०८)कलशैः स्थालप्रतिमायाः स्नात्रं कृत्वा तत्पुष्पाम्बुचन्दनाद्येकत्र गर्गर्यादौ क्षिप्त्वा मार्याक्रान्ता नृ-तिर्यञ्चः पाय्यन्ते । आच्छोटयन्ते च सर्वे सुस्थाः स्युः । तथा प्रातश्चतुर्दिक्षु मन्त्रमेतमूर्ध्वंज्ञुरञ्जलिं[2] कृत्वा सर्व-मेकैकवार भणेज्जनाकृष्टिः । तथा दीपोत्सवदिने उपोष्याचाम्लं वा कृत्वाऽस्य जाप-मारभेत शतपत्रीपुष्पैर्गरुडाक्षतैर्वा[3] १०८ प्रत्यहं जपेत् । एवं दिन २१ अभिग्रहः कोऽपि ग्राह्यः । वर्षं यावदृद्धिवृद्धिः स्यात् । पुष्पाण्यक्षतांश्च धारयेत् । इष्टाय दद्यान्महत्यै श्रिये । यदिवा वासान्तः संचूर्ण्य वश्यार्थे शीर्षे क्षिपेत् । २१ दिने जापे पूर्णे पञ्चपीठाधिष्ठायकानां सरस्वती १–त्रिभुवनस्वामिनी २–विजया ३–जया ४–जयन्ती ५–नन्दा ६–भद्रा ७–लक्ष्मी ८–गणिपिटक १, इन्द्र ६४, विद्यादेवी १६, यक्ष २४, यक्षिणी २४–एवं १२७ । तथा गौतम १–क्षेत्रपाल १–गुरुपादु(दु)का, एवं १४० । मोदकाः खारिकादिफलानि वा पत्र-पूगानि वा ढौकयेत् । कर्पूरादिना पूजयेत् । एवं प्रतिवर्षं कृते ऋद्धिः श्रीगच्छस्य । सर्वत्र स्मरणार्थमात्मानं मेरुचूलासिंहासनस्थाष्टदलाम्भोजकर्णिकास्थं प्रवचनमुद्रानिषण्णं च्छत्रचामरेन्द्रादि ऋद्धिमन्तं श्रीगौतममेव चिन्तयेदैश्वर्यलाभः । तथाऽन्नवर्षाभावे गोमयगो-मुखं तदन्तश्चान्दनं प्राकारं कारयेत्, तदन्तर्गौतमं सिंहासनादिधामन्तं चिन्तयेत् । वार १०८ मन्त्रं स्मरेत् । मन्त्राक्षराणि तत्र विवक्षितद्रव्यादौ दुग्धमभृतं क्षरन्ति । ध्यानमिदं प्राकारध्यान-मयसमवसरणमध्यगतमुपरि पतता दुग्धेनामृतेन प्लाव्यते इति ध्यानं दध्यात् । सा इति गुरु-र्वी सेसिच्यतेऽब्द इति । तथाऽर्हतः सुधासारवर्षिन्द्वयप्रयतले पद्मासनेनार्हद्(द्)ध्याय-

---

[1] प्रस्थानं पीठम् । [2] ऊर्ध्वज्ञुः ऊर्ध्वं जानुकः ॥ [3] गरुडतन्दुलैः भ्रंगतन्दुलैर्वा ॥

त्मानं निविष्टं संकल्प्य सूरिमन्त्रं स्मरतः परमैश्वर्यलाभ इति ॥

अथ श्रीसूरिमन्त्रपटलेखनविधिः—

श्रीसूरिमन्त्रपटे सप्तवलयानि। तत्र प्रथमवलये चतुर्विंशतिकोष्टकाः। तेषु चतुर्विंशति-श्रीजिनेन्द्रास्तन्नामानि वा ॥ द्वितीयवलये अष्टादशकोष्टकाः। तत्र कोष्टकषोडशके षोडश-लब्धिपदानि। सप्तदशकोष्टके—"एएसिं सव्वेसिं नमोका(क्का)रं किच्चा जमियं विज्जं पउं-जामि"। अष्टादशकोष्टके—"सा मे विज्जा पसिज्झउ स्वाहा"। विज्जाणं पीठं। १। एवमस्मिन् द्वितीयवलयेऽष्टादशकोष्टकेषु मुख्यमन्त्राक्षरसर्वसंख्या नवत्यधिकं शतम् १९०। विज्जाणं पीठं इति तु पीठनाम ॥ तथा तृतीयवलये—एकादशकोष्टकाः। तेषु प्रथमे—"ॐ श्रीइन्द्रभूतये नमः। द्वितीये—"ॐ श्रीअग्निभूतये नमः"। तृतीये—"ॐ श्रीवायुभूतये नमः"। चतुर्थे—"ॐ श्रीव्यक्ताय नमः"। पञ्चमे—"ॐ श्रीसुधर्माय नमः"। षष्टे—"ॐ श्रीमण्डितपुत्राय नमः"। सप्तमे—"ॐ श्रीमौर्यपुत्राय नमः"। अष्टमे—"ॐ श्रीअकम्पिताय नमः"। नवमे—"ॐ श्रीअचलभ्रात्रे नमः"। दशमे—"ॐ श्रीमेतार्याय नमः"। एकादशे—"ॐ श्रीप्रभासाय नमः" ॥ तथा चतुर्थवलये—"ॐ नमो भगवओ बाहुबलिस्स पन्हा(ण्ह)समणस्स" इत्यादि आयरिय कालि स्वाहा। महाविद्यापीठम्। २। अस्मिन् वलये मुख्यमन्त्राक्षरसप्तनवतिः(९७)। महा-विद्यापीठं इति तु पीठनाम ॥ तथा पञ्चमवलये—"ॐ इरियाए(ए) किरियाए" इत्यादि कालि महा-कालि स्वाहा। उपविद्यापीठम्। ।३। जापः १२००० जात्यादिभिः पुष्पैर्जप्तोऽयं सारस्वतः। अस्मिन् वलये स्वाहा यावद् मूलमन्त्राक्षर(राः) अष्टत्रिंशद्(३८) ज्ञेयाः। ततो यदुपविद्या-पीठं तत् पीठनाम। ततो यज्जापादि तद् वलयपूरणाय, मन्त्राक्षरस्वरूपज्ञापनाय च ज्ञेयम् ॥ तथा षष्ठवलये—"ॐ इरि इरि कालि किरि किरि कालि" इत्यादि "आयरिय आयरिय कालि स्वाहा"। मन्त्रपीठम् ।४। अस्मिन् वलये मुख्यमन्त्राक्षराः एकोनपञ्चाशत्(४९)। मन्त्र-पीठं इति तु पीठनाम ॥ तथा सप्तमवलये—"ॐ इरि मेरु किरि मेरु" इत्यादि "आयरिय मेरु स्वाहा"। मन्त्रराजः ।५। जापः १००००० । अस्मिन् वलये मुख्यमन्त्राक्षरत्रयस्त्रिंशत्(३३), ततो मन्त्रराज इति पीठनाम। ततो जापप्रमाणं वलयोद्धरितस्थानपूरणाय जापप्रमाणज्ञानाय च। तथा मध्ये सिंहासनोपरिस्थकमलोपविष्टा श्रीगौतमस्वामिमूर्तिः। मूर्ति(र्त्ते)रुपरि उभयतो गजेन्द्रावभिषेकं कुरुतः। मूर्तेर्दक्षिणपार्श्वे 'ॐ ह्रीं श्रीं' इति मन्त्रराजाक्षरत्रिकं लिखेत्। वामपार्श्वे तु 'शिव—शान्ति तुष्टि—पुष्टीः कुरु कुरु स्वाहा' इत्यक्षराणि लेख्यानि। तथा मूर्त्तेः परितः चतुर्दिक्षु चतुःषष्टीन्द्राणां षोडशविद्यादेवतानां चतुर्विंशतियक्षाणां चतुर्विंशतियक्षिणीनां च स्थापनाय चतुर्भागीकृता अङ्का न्यस्याः। यथा चतुर्दिक्षु षोडश—षोडश—रूपोऽङ्को लिख्यते। सर्वमीलने चतुःषष्टिः—एवं सर्वत्र।

मथ श्रीसूरिमन्त्रपटलेखनविधिः—

तथा पटस्थपीठपञ्चकलिखितसकलमन्त्राक्षरसंख्या सप्ताधिकचतुःशतीमाना (४०७) विज्ञेया । सप्तमेरुयुक्तायां श्रीचन्द्रवाचनायां पुनर्या सर्वाक्षरसंख्या ३७६, स्वाहायुक्ता ३७८ प्रमाणा वर्त्तते । तत्र प्रणवः प्रतिपीठप्रान्ते स्वाहा चेत्यक्षराणि न गृहीतानि । तत्कारणं तत्र स्वयमेवोक्तमस्ति । अत्र च पटे यथार्हस्थाने प्रणवग्रहणात् प्रतिपीठप्रान्ते स्वाहाऽक्षरग्रहणाच्च अक्षरवृद्धिर्विज्ञेया । यदा तु अयं श्रीसूरिमंत्रः पटे लेख्यते, तदा अक्षर ४०७ मानो लेख्यः । यदा च श्रीचन्द्रवाचनायां तदा अक्षर ३७६, स्वाहासहितः ३७८ मानोऽयं ज्ञेयः । अत्राष्टादशकोष्टकलेखने पूज्या इदं कारणं वदन्ति, श्रीगच्छेशमन्त्रपटेऽष्टादशलब्धिपदानि स्युस्तत्र सप्तदशकोष्टके 'ॐ नमो सव्वलद्धीणं' । तस्याधः 'सा मे विज्जा पसिज्झउ स्वाहा' इति एतल्लब्धिपदद्वयफलं चेदम्—

अक्षीणमहानसिकाजापादक्षीणकोशता ।
सर्वलब्धिजपाच्चित्यं सर्वत्रास्खलितं यशः ॥१॥

विशेषकार्ये सुरभिद्रव्यैः पात्रे एतत्पदद्वयमालिख्याष्टोत्तरसहस्रपुष्पैर्जपेत् (१००८) । फलावाप्तिः स्यादेव । एवमत्रैकविंशत्यक्षरवृद्ध्या श्रीगच्छेशमन्त्रः पटेऽष्टाविंशत्यधिकचतुःशताक्षरमानो ज्ञेयः । इति तत्त्वम् ।

इति श्रीमदञ्चलगच्छे श्रीसूरिमन्त्रपटलेखननामा यश्चिरं नन्दतात् ॥

अथ ध्यानविधिः—

[1]शाब्दाज्जापान्मौनस्तस्मात्[2] सार्थस्ततोऽपि चित्तस्थः ।
श्रेयानिह यदिवाऽऽत्मध्येयैक्यं[3] जापसर्वस्वम् ॥
अथवा [1]रेचक-[2]पूरक- कुम्भाः[4] ४-५-६ गुणत्रयं[7]स्थिरकृति-[8]स्मृती [9]हक्का ।
[10]नादो [11]ध्यानं[12]ध्येयैकत्वं [13]तत्त्वं च जपभेदाः ॥१॥
एकान्तरम्यभूमावुपविश्य सुखासनो जिताक्षगणः ।
गुरुभक्तः प्रकृतिशुचिर्दृढधर्म्मा ध्यानु(न)मुद्यतते ॥२॥
[4]ब्रह्माध्वना दिनकृतं विरिच्य रोषं तमोगुणं च समम् ।
रागं च राजसगुणं कृष्णारुणमर्कमार्गेण ॥३॥

---

१ शाब्दाज्जापाद् मौनो जापः श्रेयान् । २ मौनादपि जापात् सार्थ [:] अर्थसहितो जापो रम्यः । ३ आत्मनः ध्येयस्य च ऐक्ये आत्मध्येयैक्यम् ॥ ४ गुणत्रयं सत्त्वरजस्तमोगुणरूपम् । ५ जपभेदाः १३ वर्ण्यन्ते ।

[1]आक्षिप्य [2]वीतरागं सत्त्वगुणं पूरकेण चन्द्रपथे ।
कुम्भेन स्थिरयित्वा ध्यायति शान्त्यै च बन्ध-मोक्षाय ॥४॥

विक्षिप्य सत्त्वमुज्ज्वलमाक्षिप्य रजो वशीकृतिस्तम्भे ।
आक्षिप्य तमश्च रुषा द्वेषोच्चाटनमृतीः कुर्यात् ॥५॥

यद्विवा प्रागुक्तवक्ष्यमाणे मन्त्रपदे रेचनात् पुरः पश्येत ।
आक्षिप्य पूरकेण तु हृदि कुम्भेन स्थिरीकुर्यात् ॥६॥

रेचकतो द्वेषमृती पूरकतो वश्यलाभसंक्षोभान् ।
कुम्भकतोऽरिस्तम्भं कुर्वीत त्रिगतमन्त्रपदैः ॥७॥

व्यालातपशीतरुजा क्लेशावेशेऽपि मधुरभक्तादौ ।
न क्षुभ्यति मन्त्रपदे लीनमनास्तत्स्थिरीकरणम् ॥८॥

मन्त्रस्य हृदि स्मरणं नासाग्रे दृक् स्मृतिः सकृत् सा [3]तु ।
द्विस्त्रिरियं परिवृत्तिर्निःशब्दहृदेकतां प्राप्ता ॥९॥

सहसा रोषहका मन्त्रान्ते क्षोभदा ग्रहाद्यपहा ।
यद्वा[4] निःश्वासे हस्तत्सहचारी स उच्छ्वासे ॥१०॥

शून्यशिरस्त[द्]द्वयमयमेके सर्वे स्मरन्ति मन्त्रपदम् ।
नादो भृङ्गध्वनिरिव [5]शङ्खिन्युत्थस्त्वनाहतो नादः ॥११॥

ध्यानं तु वर्णमण्डलतत्त्वानुगमत्र लब्धिमन्त्रपदम् ।
श्वेतं भू-जल-मण्डलतत्त्वगतं शान्तिपुष्टिदं विषहम् ॥१२॥

अरुणं तु वह्निमण्डलतत्त्वं प्राक् तत्त्वगं च वश्याय ।
पीतं भूमण्डलतत्त्वगं च कुर्यान्मुखं स्तम्भम् ॥१३॥

---

१ आक्षिप्य आकृष्य ततः कुम्भेन मध्ये स्थिरयित्वा ध्यायति । २ गतरागं सत्त्वगुणं चन्द्रमार्गे पूरकेण । ३ तुः पुनः सा स्मृतिः द्विः त्रिः क्रियते इयं परिवृत्तिरुच्यते । कथंभूता निःशब्दहृदेकतां प्राप्ता । ४ यद्वा योगिनो हंस इति मन्त्रपदं स्मरन्ति । योगिनां निःश्वासे हः किंभूतो ह[:]? शून्यशिराः शून्यं शिरसि(रः) यस्यासौ शून्यशिराः 'हं' इत्यर्थः । तस्य हस्य सहचारी सः परं सः उच्छ्वासे योगिनां ज्ञेयः । तद्द्वयमयं हंस इति । वर्णद्वयमयं मन्त्रपदम् । ५ शङ्खिनी आदिकुण्डलिनी तत उत्थः, अनाहतो नादः ।

रोहिणिपमुहादेवी चउसट्ठिसुराहिवा तहा अन्ने।
सेवइ गोयमचलणे जक्खा-जक्खिणिचउव्वीसं ॥ १३ ॥
कणयमयसहसपत्ते कमलम्मि य संठिओ य लद्धिजुओ।
बहुपाडिहेरकलिओ झायव्वो गोयममुणिंदो ॥ १४ ॥
'आँ क्राँ ह्रीँ श्रीँ' एएणं मंतेण झाणारंभे ठविज्जए निच्चं।
अंजलिकरमुद्दाए संनिहियसुराण समवाओ ॥१५॥
संनिहियसुरवराणं उस्सग्गो कीरए सुपूयाय।
कप्पूरधूववासेहिं सुव्वया विहियबंभवओ ॥ १६ ॥
थोवजलविहियन्हाणो वरवत्थविभूसिओ य तिक्कालं।
कम्मक्खयहेउं जो समरइ विज्जं इमं लक्खं ॥ १७ ॥
सोहग्ग य परमिट्ठी सुरहीपवयणकरंजली झाणे।
मुद्दापंचगमेयं कायव्वं सव्वकालं पि ॥ १८ ॥
किं चिन्तामणि कामधेणु कप्पद्दुम सुंदर
नवनिहि चउदसरयणपवर चक्कित्तण मणहर।
राजा सुवयणि सिरिसूरिविज गोयमसुपइट्ठिय
भुवणत्तय अक्खलियमहप्प निट्ठियकम्मट्ठय ॥ १९ ॥

इति स्तुतिः ॥

औत्सुक्ये स्मरणायोग्यस्थानाभावे वा मन्त्रपटमभ्यर्च्य सौभाग्याय सौभाग्यमुद्रया, अधिष्ठायकानां सजीवितापादनाय सुरभिमुद्रया, कर्मक्षयाय परमेष्ठिमुद्रया, क्षुद्रोपद्रवशान्त्यै गरुडमुद्रया, अरिक्षयार्थं चक्रमुद्रया एकैकवारं सर्वमन्त्रं जपेत्। नवरं सौभाग्यमुद्रा ह्रींपूर्वाणि पीठानि शेषमुद्राचतुष्के ॐ पूर्वाणि पीठानीति। ततः सर्वमन्त्रं १०८ अथ ५४ अथ ३६ यथार्हं स्मरेत्। मनःस्थैर्याय शीर्षे हृदि नाभौ वा १६ दलमम्भोजं ध्यात्वा प्रतिपत्रं सृष्ट्या एकैकं लब्धिपदं ध्यायेत्। स्मरणां कुर्वन्नक्षरशुद्धिमक्षरसंख्यां पीठानामाराधनाविधिं अधिष्ठातॄंश्च चिन्तयेत्। गुरूपदेशं विस्मार्य शुकपाठं न कुर्यात्।

संक्षिप्तस्मरणाधिकारः—

समवसृतौ मुख्योऽक्षोवीरः शेषाक्षतश्चतुर्वक्त्रः।
[1]अग्न्यादौ तु कपर्दीन्यासा द्वादशसभाश्च स्युः ॥ १ ॥

---

१ आग्नेयकूणादिच्चतुर्दिक्षु कपर्दीनां त्रिक-त्रिकन्यासात् १२ सभा ज्ञेयाः।

तत्रैष गौतमोऽहं कर्पूराद्यैस्तमर्चयेद् भक्त्या ।
एवं च नाभिकमले ध्यायन् सूरिः स सर्वज्ञः ॥ २ ॥

मुख्योऽर्हन् पूर्वस्यां सिद्धा [1]सौम्येऽस्य गौतमः स्वामी ।
याम्ये वोपाध्यायः [2]साधुरधश्चेति पूज्यपदाः ॥ ३ ॥
मध्ये कपर्दिकानां न्यासः सचतुर्गतिस्तु संसारः ।
तत्र ममैते शरणं तदर्चयेत् पञ्च पूज्यपदान् ॥ ४ ॥

अक्षाणां मुष्टित्रयमर्पयति गुरुस्तथैव मुष्टिगतः ।
त्रिजगद्व्यवहारोऽयं संकेतः स्याज्जनसमक्षम् ॥ ५ ॥
वासाहुतिनिक्षेपः शङ्खाग्रिममुद्रयाऽन्नलाभाय ।
पल्लवमुद्रादर्शनमिह शिष्याणां समृद्ध्यै स्यात् ॥ ६ ॥
विजितेन्द्रियविषयमना जितदम्भक्रोधमदमायः ।
उभयकुलशुद्धसाधुर्गृहीतसिद्धान्तसारमतिः ॥ ७ ॥

सुविहितयोगोद्वहनः शुद्धाचारो जिनांह्रिगुरुभक्तः ।
श्रीवर्धमानविद्याकल्पे योग्योऽस्य सूरिमन्त्रे च ॥ ८ ॥
पूर्वाद्यष्टक्रमतः १स्तम्भं २दहनं च ३मृत्यु-४विद्वेषौ ।
५-६वश्योच्चाटन-७-८शान्तिकमीशाने सर्वकर्माणि ॥ ९ ॥
पूर्वाद्यष्टक्रमतः १स्तम्भ-२द्वेषावथा३कृषिं ४[द्वि?]ष्टम् ।
५-६शान्त्युच्चाटन-७मारणमिति केचिदप्याहुः ॥ १० ॥
सूर्योदयादि चैत्राद्या मासाः पञ्चघटीक्रमाः ।
एवं दिवानिशं वर्षं वसन्तादिऋतुः स्मृतः ॥ ११ ॥

आकृष्टि(१)-रुपो(२)चाटन(३)-मारण(४)-पुष्टिश्च(५)शांतिकं(६)क्रमशः।
षड्ऋतुषु ज्ञेयमिदं यद्द्वैके कालविधिमाहुः ॥ १२ ॥

पूर्वान्हे(ह्णे)(१) वश्यकर्म्माणि मध्याह्ने(२) प्रीतिनाशनम् ।
उच्चाटनमपरान्हे(ह्णे)(३) संध्यायां मारणं स्मृतम् ॥ १३ ॥

---

१ सोमे उत्तरस्याम् । २ अधश्चेति पश्चिमायां दिशि ॥

शान्तिकर्म्मार्द्धरात्रे च(५) प्रभाते(६) पौष्टिकं तथा ।
वश्यं मुक्त्वाऽन्यकर्म्माणि सव्यहस्तेन योजयेत् ॥ १४ ॥
शान्तौ(१) पुष्टौ(२) मुक्तौ(३) श्वेतं(१) क्षोभेऽतिपीतमत्यरुणम् ।
वश्याकृष्टौ(३) द्वेषोच्चाटे धूम्रं मृतौ महाकृष्णम् ॥ १५ ॥

ध्यानमिति शेषः ॥

पार्थिवे[१](१) स्तम्भनं पुष्टिर्वश्यं(२) शान्तिर्जलात्मके ।
आग्नेये(३) कर्षणं दाहो वायौ(४) द्वेषो मृतिः परे ॥ १६ ॥
[२]वश्यं(१) बालस्वरे द्वैते[३] आकृष्टिं(२) च युवात्मके ।
शान्तिं(३) वश्यं च पुष्टिं च द्वेष-स्तम्भौ च वृद्धके ॥ १७ ॥
मृत्युं मृत्युस्वरे कुर्यादाद्यपञ्चस्वरक्रमात् ।
बालादिकस्वरो ध्याता कार्यानुमितमानसः ॥ १८ ॥
नमोऽर्चनकाले(१) होमे(२) स्वाहा शान्तौ(३) स्वधा कृषौ(४)।
वषट् क्षोभेऽथ(५) संवौषट् द्वेषे फडिति थे मृतिः ॥ १९ ॥
स्फटिक(१)-प्रवाल(२)-मुक्ता(३)-चामीकर(४)-पुत्रजीवमालाभिः(५)।
बीजैः(६) पद्मोत्थैरथ शान्त्याद्युचितं जपं कुर्यात् ॥ २० ॥
पद्मासनाद्यमासनमथ मुद्राः सपरमेष्ठिमुद्राद्याः ।
सितपत्रादिभिरर्चा कुङ्कुम-गोरोचनादिलेख्यदलम् ॥ २१ ॥
दण्डासनं(१) स्वस्तिक(२)-पङ्कजे(३) च
स्यात् कुर्कुटं(४) वज्रयुतं(५) च भद्रम्(६) ।
आकर्षणे(१) वश्य(२)—वधे(३) च रोधे(४)
शान्तौ(५) तथा द्वेष(६)विधौ वदन्ति ॥ २२ ॥

इत्यासनानि ॥

आकृष्टि(१)—वश्य(२)—वध(३)—रोध(४)—विबोध(५)-शान्ति(६)-
विद्वेषणेषु शृणि(१)रम्बुज(२)—वज्र(३)—शङ्खाः(४) ।

---

१ पृथिवीतत्त्वे स्तम्भनं क्रियते । एवमग्रेऽपि त्रिकं जलतत्त्वे १ ।
२ तथा स्वराः पञ्च सन्ति तत्र बालस्वरे वश्यं कार्यम् ।
३ द्वैते द्वितीये कुमारस्वरे आकर्षणं कार्यम् । युवस्वरे शान्त्यादि ।

चोव(५)-प्रवाल(६)सहिताः षडमूर्हि मुद्राः
विद्रावणाय दुरितस्य सदा विदध्यात् ॥ २३ ॥
सौवर्ण-रजत-कांस्यजपात्रं तत्रैव युज्यते साधोः ।
संघस्य कार्यहेतोः सर्वं युज्येत नान्यत्र ॥ २४ ॥
प्रायोऽत्र सूरियन्त्रं महतां कार्ये शुभे महति योज्यम् ।
तेन विलिख्य सुपात्रे कर्पूराद्यैरिदं पूज्यम् ॥ २५ ॥
पूरक-रेचकयोगादाह्वान-विसर्जने करोतु बुधः ।
पूजाभिमुखीकरणस्थापनकर्माणि कुम्भकतः ॥ २६ ॥
मोक्ष(क्षा)(१)-भिचार(२)-लक्ष्मी(३)-शान्त्या(४)कृष्टि(५)[:]
क्रमेण जापविधौ ।
अङ्गुष्ठादिकनिष्ठान्तं यावद् वर्त्तेऽक्षसूत्रविधौ ॥ २७ ॥
स्तम्भेऽथ(१) शान्ति(२)-पुष्ट्योः वश्ये(३) उच्चाटने(४) मृतौ क्रमतः ।
भूम्यादिमण्डगतं ध्यायति तदर्थकृते -- ॥ २८ ॥
पूर्वान्हे (ह्णे) मध्याह्ने मध्यनिशायां निशान्त्यके यामे ।
वश्यं स्तम्भं शान्तिं पुष्टिं कुर्यात् क्रमेणैवम् ॥ २९ ॥
दीपन१-पल्लव२-संपुट३-रोध४-ग्रथना५-ऽवदर्भणैः६ कुर्यात् ।
शान्ति-द्वेष-वशीकृति-बन्धन-आकर्षण-स्तम्भान् ॥ ३० ॥
आदौ नामनिवेशो दीपनमन्ते च पल्लवो ज्ञेयः ।
तन्मध्यगतं संपुटमथादिमध्यान्तगो रोधः ॥ ३१ ॥
ग्रथनं वर्णान्तरितं द्व्यक्षरमध्यस्ततो विदर्भः स्यात् ।
षट्कर्मकरणमेतज्ज्ञात्वाऽनुष्ठानमाचरेद् विद्वान् ॥ ३२ ॥
दिक्कालमुद्राऽऽसनपल्लवादि-
भेदं परिज्ञाय जपेत् सुमन्त्री ।
न चान्यथा सिद्ध्यति तस्य मन्त्रः
कुर्वन् सदा तिष्ठतु मन्त्रजापम् ॥ ३३ ॥

केचिच्च वश्या१-कृष्टि२-स्तम्भन३-मारण-४विद्वेष५-
चलन६-शान्तिकं७ पुष्टिम्८ ।
कुर्यात् सोम१-[1]यमामर२-३-[2]हराग्नि४-५-[3]मरुदुदधि-६-७
निर्ऋति८-दिग्वदनः ॥ ३४ ॥

इत्यपि तथा—

महती बृहती उक्ता न्यासीति चतुर्विधेह मन्त्रोक्तिः ।
महती स्वपाठसिद्धिर्बृहती चाल्पजपबहुसिद्धिः ॥ ३५ ॥
उक्ताऽथ गौतमी सा जाप-तपोऽर्चाच्च पूर्वभृद् यावत् ।
न्यासीत्येकत्र पदे बहुदेवीनामविन्यासः ॥ ३६ ॥

अत्र पूर्वभृद् यावदिति, पूर्वभृतो यावदाद्यास्तिस्रः, तदनु न्यासीपदे देव्यादिनामन्यास इत्यर्थः । तथा चतुर्धा मन्त्रजातिः । १ आणवः २ कार्मजः ३ प्रवर्त्तकः ४ निवर्त्तकः । आणवः सत्कर्मबीजः । कार्मजः सत्कर्मोदयः । प्रवर्त्तकः सत्कर्म प्रवर्त्तयिता । निवर्त्तको मोक्षहेतुः । तथा चतुर्धा मन्त्रस्मरणरीतिः । १ वैखरी २ पश्यन्ती ३ मध्यमा ४ परा । बैखरी स्पष्टोच्चारणा । पश्यन्ती अर्थदृष्टिः । मध्यमा हृदये सर्ववर्णव्यापका । परा ध्वनिरहित-सर्ववर्णस्थानस्पर्शिका ।

अणिमा१ महिमा२ चेति लघिमा३ गरिमा४ तथा ।
प्रो(प्रा)काम्या ६प्रहतीशित्व-वशित्वेत्यष्ट७-८ महासिद्धयः ।

इह मुद्राः शास्त्रान्तरेषु भूयस्यो दृश्यन्ते परं सूरिमन्त्रोपयोगिन्यः सप्तदश । तद् यथा—उत्तानहस्तद्वयेन वेणीबन्धं विधायाङ्गुष्ठाभ्यां कनिष्ठिके तर्जनीभ्यां च मध्यमे संगृह्यानामिके समीकुर्यादिति परमेष्ठिमुद्रा १ । आत्मनोऽभिमुखदक्षिणहस्तकनिष्ठिकया वामकनिष्ठिकां संगृह्याधः परिवर्त्तितकराभ्यां गरुडमुद्रा २ । वामहस्ततले दक्षिणहस्तमूलं संनिवेश्य करशाखा विरलीकृत्य प्रसारयेदिति चक्रमुद्रा ३ । परस्पराभिमुखौ ग्रथिताङ्गुलीकरौ कृत्वा तर्जनीभ्यामनामिके गृहीत्वा मध्यमे प्रसार्य तन्मध्येऽङ्गुष्ठद्वयं निक्षिपेदिति सौभाग्यमुद्रा मध्यमसौभाग्यहेतुः ४ । अत्रैवाङ्गुष्ठद्वयस्याधः कनिष्ठिकां तदाक्रान्ततृतीयपर्विकां न्यस्येदिति सबीजसौभाग्यमुद्रा सौभाग्योत्कर्षहेतुः ५ । दक्षिणाङ्गुष्ठेन तर्जनीं संयोज्य शेषाङ्गुली-

---

१ अमरो धनदः, तस्य दिग् उत्तरा । २ हर ईशा ईशानकूणः । ३ उदधिः समुद्रः, तदधिष्ठाता वरुणः, तस्य दिग् ॥

प्रसारणेन वामहस्तं हृदि न्यसेदिति प्रवचनमुद्रा ६। उभयोः करयोरनामिका-मध्यमे परस्परानभिमुखे ऊर्द्ध्वीकृत्य मीलयेत्, शेषाङ्गुलीः पातयेत् पर्वतमुद्रा ७। अन्योऽन्यग्रथिताङ्गुलीषु कनिष्ठिकाऽनामिकयोर्मध्यमा-तर्जन्योश्च योजनेन गोस्तनाकारा सुरभिमुद्रा ८। दक्षिणहस्तस्य तर्जनीं वामहस्तमध्यमया संदधीत, मध्यमां च तर्जन्या, अनामिकां कनिष्ठिकया, धेनुमुद्रेत्यन्ये ९। उत्तानौ किञ्चिदाकुञ्चितकरशाखौ पाणी धारयेदञ्जलिमुद्रा १०। हस्ताभ्यामञ्जलिं कृत्वाऽनामिकामूलपर्वाङ्गुष्ठसंयोजनेनावाहनी ११। इयमेवाधोमुखी स्थापनी १२। संलग्नमुष्टयुच्छ्रिताङ्गुष्ठौ करौ सन्निधानी १३। तावेव गर्भगाङ्गुष्ठौ सन्निरोधिनी १४। मुष्टिं बद्ध्वा प्रसारितितर्जनिका-मध्यमोपरिनिवेशिताङ्गुष्ठावगुण्ठनमुद्रा १५। दक्षिणकरेण मुष्टिं बद्ध्वा तर्जनी-मध्यमे प्रसारयेदित्यस्त्रमुद्रा १६। प्रालम्ब्य पुष्पादेरुपरि संहारेण हस्तं प्रसार्य कनिष्ठादि-तर्जन्यन्तानामङ्गुलीनां क्रमसंकोचनेनाङ्गुष्ठमूलानयनाद् विसर्जनमुद्रा १७॥

ॐ श्री गौतमाय नमः।

नत्वा जिनं गुरुं किंचिज्ज्ञानं वक्ष्यामि सिद्धिकृत।
पञ्चाशल्लब्धयः सुष्ठुव्रतभाजाममूर्मताः॥ १॥
१जिनावधि२-परा३-ऽनन्ता४-५नन्तानन्तावधेर्जिनाः।
सर्वावधि६ज(जि)ना ७बीज-८कुष्टबुद्धि-९पदानुगाः॥ २॥
संभिन्नश्रोतसः(१०) ११क्षीर-१२मध्वाश्रवा-१३मृताश्रवाः।
१४अक्षीण-१५जल्ल-१६खेला-१७ऽऽम-१८विप्रुट्-१९सर्वाग्रिमौषधिः॥३॥
वैक्रियाः२० सर्वलब्धिश्च२१ ऋजोश्च२२ २३विपुलानमतिः।
२४जङ्घा-२५विद्या-२६प्रज्ञामुनि-२७विद्यासिद्ध-२८नभोगमाः॥४॥
२९तप्त-३०शीत-३१तेजोलेश्याः३२दृष्ट्याशीर्विष३३-३४वाग्विषाः।
३५चारणास्तु ३६महास्वप्नाः ३७तैजसाऽग्निनिसर्गिणः॥५॥
३८वाद्यष्टांङ्गनिमित्तज्ञाः३९ प्रतिमाप्रतिपन्नकाः४०।
४१जिनकल्पप्रतिपन्ना ४२अणिमाद्यष्टसिद्धयः॥ ६॥
४३-४४-४५केवलित्रितयं ४६चोग्रतपोदीप्ततपस्विनः४७
४८चतुर्दश ४९[दश?]पूर्वविद ५०एकादशाङ्गवित्॥७॥
महाराज१-महाश्रेष्ठि२-चक्रभृत्त्रितयं३-४-५ बलः६।
षडेता लब्धयः कर्मभवा न ध्यानजाः स्फुटम्॥ ८॥

एकैकलब्धिभाजः स्युर्विद्याविंशतिसिद्धयः ।
विद्यासहस्रमित्येतत्पञ्चाशल्लब्धिगं मतम् ॥ ९ ॥
आद्यपीठे इदं ब्राह्म्यध्यक्षं बाहुबलेः पुरः ।
आख्यन्नाभिभवः पीठस्यास्य ब्राह्म्यधिदेवताः ॥ १० ॥
तथा मन्त्रसहस्रं च मन्त्रराजान्तरानुगम् ।
विद्याससाधनामन्त्रः पाठसिद्धोऽत्र लक्षणम् ॥ ११ ॥
लब्धे स्तुतिपदैकत्वमथैषां कार्यकृत्क्रमः ।
सप्रणव-नमः पूर्वमिष्टदा सर्वलब्धयः ॥ १२ ॥
श्रीमदञ्चलगच्छेशाः श्रीमेरुतुङ्गसूरयः ।
आलोक्यानेकसूरीन्द्रमुख्यमन्त्रोपयोगिनः ॥ १३ ॥
ग्रन्थान् गच्छोपयोगार्थं सारोद्धारं व्यधुः स्वयम् ।
श्लोकाः पञ्चाशतान्यत्राष्टापञ्चाशच्च निश्चिताः ॥ १४ ॥

इति श्रीविधिपक्षमुख्याभिधानश्रीमदञ्चलगच्छेश–श्रीमेरुतुङ्गसूरिलिखितः ॥
श्रीअञ्चलगच्छश्रीसूरिमुख्यमन्त्रकल्पः ॥ ग्रन्थाग्रम् ५५८ ॥

श्रीदेवाचार्यगच्छीय - अज्ञातकर्तृकं

दुर्गपदविवरणम् ॥

एतस्य सूरिमन्त्रकल्पस्य दुर्गपदविवरणं भण्यते—

पयं एसिं न सुयं गुरुवयणाओ न य दिट्ठं कत्थइ गंथे लिहियं ।
उवएसा उवलद्धं जं तं विवरेमि अह पयडं ॥ १ ॥

वंदणयं दाऊणं गीयत्थाणं समग्ग(स)मुणीणं ।
ते विन्नवेमि पयओ खमियव्व मह इमं सुणह ॥ २ ॥

तुम्हाणं जइ चित्ते कुणी संपडइ मज्झ वयणम्मि ।
तो आयरंतु एयं अह नो मिच्छादुक्कडमिमस्स ॥ ३ ॥

चतुःपीठ्यावली संक्षेपो महाकल्पवाक्य इति पूर्वोक्तमर्थः । पीठान्तराणि— प्रथमं विद्यापीठम् । द्वितीयं महाविद्यापीठम् । तृतीयं उपविद्यापीठम् । चतुर्थं मन्त्रपीठम् । [illegible] समवायः । स च ईदृक्—जिन-अवधि-परम-अनन्तावधिजिनादि [illegible] रूपेषु कोष्ठाद्यष्टादश-द्वादश-त्रयोदश-चतुर्विंशतिसंख्याः 'सिद्धिपद' मन्त्राः [illegible] पीठमिति । इदं च अष्टाभिर्विद्याभिरलङ्कृतं [illegible] । तद्यथा— [illegible] १, रोगापहारिणी २, विषापहारिणी ३, [illegible] ४, [illegible] ५, [illegible] ६, दोषनिर्णाशिनी ७, अशिवोपशमनी ८. [illegible] प्रतिष्ठन्तु मन्त्रस्तत्वादयोऽविवदे अयं भावार्थः । [illegible] । प्रणवनमोयुक्तानि पदानि सर्वाणि इष्टं कार्यं जनयन्ति, न प्रणवं विना । यतः प्रणवं पदं मोक्षबीजम्, निर्बीजं ध्यानम् । [illegible] विद्यास्थितं [illegible] पठनीयमित्यादि [illegible] । [illegible] कार्यमुच्चारणीयम् ॥ १

आमोसहिलद्धीणं विप्पोसहिलद्धीणं खेलोसहिलद्धीणं जल्लोसहिलद्धीणं सव्वोसहिलद्धीणं भव्यानां कुष्ठादिमहारोगे समुत्थिते अनया शरीरं स्पृश्यते । ताम्बूले [illegible] दीयते । इमां श्रीखण्डेनालिख्य सुरभिद्रव्यैः पूजयित्वा कांस्यपात्रे दुग्धेन प्रक्षाल्य [illegible] । एतान्यक्षराणि आरात्रिकोपरि दुग्धसमुद्रं वा वर्षन्तीति ध्यानं महारोगे नान्यत्र रोगहरी ॥ २

आसीविसलद्धीणं खीरासवलद्धीणं महुयासवलद्धीणं अमियासवलद्धीणं एषा विषापहारिणी, अनया शरीरस्पर्शादिः, पूर्वरीत्या पूर्वोक्तध्यानम् ॥ ३

जिन-अवधि-परमावधि-अनन्तावधिकेवलित्रयम् । एतानि बन्धमोक्षणी । अत्र पूर्वरीत्या ध्यानं स्पर्शनादि । एतेषां श्रीखण्डलिखितानामधोभागे बद्धनामालिख्य निरन्तरं पूजा ध्यानं च कार्यम् । महतां बन्धमोक्षे नान्यत्र ॥ ४

बीयबुद्धीणं कुट्ठबुद्धीणं संभिन्नसोयाणं अक्खीणमहाणसलद्धीणं सव्वलद्धीणं एतानि श्रीसंपादिन्याम् । ध्यानं पूर्वरीत्या निरन्तरम् । महतां सुस्थाननिवेशितश्रीणामलाभोपद्रवे प्रयोजनीयम् ॥ ५

उग्गतवचरणचारीणं दित्ततवाणं पडिमापडिवन्नाणं एतानि परविद्याच्छेदिन्याम्, ध्यानं वज्रपञ्जरमध्यस्थोऽहम् ॥ ६

जंघाविज्जाचारणाणं वेउव्वियइड्ढिपत्ताणं आगासगामीणं एतानि दोषनिर्नाशिन्यां ध्यानम्, सुरासुरपरिष्कृतः । सर्वव्यापी सर्वदिग्गामी अहम् । एतेषु ध्यायमानेषु क्षुद्रदोषः समीपस्थो न भवति । महतां महादोषे प्रयोजनीयम् ॥ ७

मणपज्जवा(व)नाणीणं सीयलेसाणं आसीविसदिट्ठीविसचारणमहासमणभावणाणं तेयग्गिनिसग्गाणं नमोयुकसविशेषणप्रत्येकप्रातिहार्यस्य पदानि सप्रणवनमोयुक्तद्वात्रिंशत्संख्यस्तुतिपदानि अशिवोपशमिन्याम् ॥ ८

श्रीखण्डविलिप्तकांस्यपात्रे आलिखितसमवसरणे 'ॐ अर्हँ श्रीयुगादिनाथाय स्वाहा' मध्ये इत्यालिखेत् । तदधोभागे आर्त्तस्य नाम । ततः पूर्वस्याम् 'विनीतायां राज्यं करोति' इत्यालेख्यम् । उत्तरस्याम् 'पुत्राणां राज्यं ददाति, व्रतं गृह्णाति, इक्षुरसेन श्रेयांसः प्रीणयति' इत्यादि लिखेत् । दक्षिणस्यां 'मौनी विहरति' । पश्चिमायाम् 'उत्पन्नकेवलो भव्यान् प्रबोधयति' ततो निखिलमन्त्रस्य करेणाष्टोत्तरं शतं जापः । सुरभिद्रव्यैः सितकुसुमैः पूजा कार्या । पूर्वतःततो 'भक्तामर' स्तवेन स्तवनीयः । ततश्चैत्यवन्दनां विधाय शान्तिं भणित्वा श्रीखण्डसंपृक्तजलेनाष्टोत्तरकलशशतेन स्नात्रं क्रियते । तेन स्नात्रेणार्त्तोऽभिषिच्यते । यन्मण्डले लिखितं तदेव ध्यानम् । यद्वा युगादिनाथजन्मकल्याणकं यादृग्रीत्या कल्पे । एतद्वादे विवादे रणे राजकुले राज्ञि प्रत्यनीके नित्योपद्रवे विघटिते कार्ये महति रोगे चिरदोषग्रस्तेऽन्यस्मिन् विषमापत्स्थाने महतां सम्यक्त्वशालिनां स्थिरधर्माणामाराधितरत्नत्रयाणां पदस्थानां प्रयोजनीयं नान्येषाम् । अथवा 'यैः शान्तरागरुचिभिः' इत्यादिको 'ज्ञानं यथा त्वयि विभाति कृता०' एतदन्तः स्तवो नित्यं भणनीयः । सर्वेषामात्मनः सदा शान्तिकम् । अयमेव श्रीपुण्डरीकादेशाऽतिस्पष्टः । गणधरविद्यागर्भितं वृत्ताष्टकमिदं प्रातरेव भणनीयम्, नान्यवेलायाम् ॥ अतः कारणात् सर्वकार्यप्रसाधिकाः ॥

इति प्रथमपीठविवरणम् ॥

कल्पेऽप्युक्तम्—

प्रणवनमोयुक्तबाहुबलेर्विशेषणनवपदयुक्तास्य मिध्यतां मम भगवती महा(ह)ती महाविद्या स्वाहा। अतः कारणान्महाविद्यापीठं बाहुबलिभाषितं तीर्थकृत्कर्मनिर्मितं दीक्षानन्तरं संभवति। पूर्वं ज्ञानचतुष्टयं नवधा बाहुबलीरूपतीर्थकृत् ते च इमे नवप्रकाराः— प्रज्ञाश्रमणत्वं मतिज्ञानरूपम्। महाप्रज्ञाश्रमणत्वं समस्तश्रुतज्ञानरूपम्। शतबलवीर्यत्वं महाबलत्वं अवधिज्ञानरूपम्। योधपराक्रमत्वं सहस्रमल्लत्वं महाबाहुत्वं महाबलविक्रमत्वं मनःपर्यवरूपम्। ततः प्रणवयुक्तवग्गुचतुर्द्धा तत्पट्पदानि गुरुगम्यानि। एवं दश। ततः पञ्च महुमहुरे स्वाहापर्यन्तं केवलज्ञानरूपम्। ईदृशं महापीठम्। एता महाविद्याः। अस्य मध्ये आदेशविद्या जया विजया अपराजिता। महापन्न(ण्ह)समणस्स एतदन्ता आदेशविद्या। शतबलत्वादीनि षड्विशेषणपदानि महती महाविद्या स्वाहान्तानि। जया-विजया-अपराजितायामादेशो भवत्याराधकस्य। आदेशविद्याप्रयुञ्जनं भव्यानां स्थिरधर्माणां भवति नान्येषाम्। अथवा उदयप्राप्तानां तीर्थश्रुतसंघप्रत्यनीकानां भयङ्करादेशकः(क)री। जयः स्वदेशे, विजयः परदेशे। अपराजितत्वं तीर्थादिप्रत्यनीकमध्ये महापीठस्मरणेन पूर्वादिष्टसारस्वतादिसाधनायां जयविजया-ऽपराजितत्वं भवति। वग्गु इत्यादि महुमहुरे किपिसिहि आरि कालि स्वाहा। एतानि केवलज्ञानमयपदानि। केवलमस्याः स्मरणेन त्रिभुवनेऽप्यप्रतिहतशासनो भवति। नमोयुक्तभगवतो बाहुबलेरित्यादिविशेषपदनवकं वग्गु इत्यादि पञ्चदश किपिसिहिआरि कालिस्वाहान्तं महाविद्यापीठम्।

इति द्वितीयपीठविवरणम् ॥

अथोपविद्यापीठम्—

एतेनैतदेव भवति; सारस्वतादि आदिष्टं कार्यं प्रयुक्तं सविलम्बं सिध्यति यदा, तदा तत्कार्यं विचिन्त्य स्मरणीयं शीघ्रं सिध्यति। शिष्यपरम्परया या काचिद् गुरूणां सिद्धिरस्ति साऽल्प–बहुत्वाव्युच्छित्तिर्भवति। शापानुग्रहसामर्थ्यं च। अत उपविद्यापीठमुक्तम्। इरियाए इत्यादि महाकालिस्वाहान्तम्। अस्य विवरणमिदम् ॥३॥

[इति तृतीयपीठविवरणम्] ॥३॥

अथ मन्त्रपीठम्—

पीठत्रये यत् कार्यं पूर्वोक्तं तत् सर्वमविलम्बमप्रतिहतं सिध्यति। नवरं विद्या ससाधना। [१]असाधनो मन्त्रः। अनेनैकेनैव पूर्वोक्तं सर्वं सिध्यति। विद्यासाधना कल्पे उक्ता। अतो

१ स्त्रीदेवता च विद्याऽतः पीठत्रयं सरस्वती-त्रिभुवनस्वामिनी-श्रिया देव्यः। मन्त्रपीठे च गणिपिटकः पुरुषदैवतत्वान्मन्त्रस्य ॥

मन्त्रपीठं भगवतामेकोनविंशत्यतिशयाष्टप्रातिहार्यरूपम् ॥

इति चतुर्थपीठविवरणम् ॥४॥

अनन्तज्ञान–अनन्तदर्शन–अनन्तवीर्य–अनन्तानन्दमयं पीठचतुष्टयमेवास्ति । ध्यातुर्नित्यस्मरणेऽनन्तचतुष्टयसिद्धिः संपद्यते । ततोऽनन्तचतुष्टयगर्भितश्चतुष्पीठस्वामी सर्वकर्मक्षयकारी मोक्षरूपो मन्त्रराजः सपञ्चसंख्यपदः, न षट्संख्यः, न सप्तसंख्यः । षट्संख्यः सप्तसंख्यो यो दृश्यते स कथं किमध्ये इगि संभवति ! हिमध्ये विरिति नवमो नास्ति । गौतमवाचनायं(यां) यन्मन्त्रराजे एकादशपदानि, तदसत्यम् । ग्रन्थन–संदर्भादीनि अक्षराणि सन्ति, तदेवासत्यम् । कुत इदम् । यावन्नवगुणस्थानप्राप्तिस्तावत्कोट्यंशो मन्त्रः । ततो नवपदानि संभवन्ति । ग्रन्थनादीनि लौकिकमिथ्यात्विके मन्त्र–व्याकरणेऽर्हन्ति । अतो नैवान्यत्र । यत् कल्पे उक्तानि तत् शिष्यसंमोहार्थं न श्रद्धेयमेव उन्मत्तवचनवत् । तर्हि कोटयंशो मन्त्रः कथम् ? केवलज्ञानेन द्रव्याद्यनन्तं यद् वीक्ष्यते तस्य तत् कोटयंशं कोटिभागमवलोकयत्यस्य ध्याता । अतः कोटयंशोऽयम् ? सांप्रतं सिद्धौ सत्यामष्टोत्तरशतांशं यावदवलोकयति प्रमादबाहुल्यात् । अंशानयनं कल्पोक्तम् । अतः पीठोद्धारेऽष्टोत्तरपदशतानि संभवन्ति । ऊर्ध्वं न संभवन्ति । अष्टोत्तरशतपदमध्याद् यावन्ति तावन्ति भवन्ति तर्हि पञ्चपदानि कथम् ? ज्ञानं दर्शनं चारित्रं जीवः । गतिश्च प्रत्येकं पञ्चधा । रत्नत्रयरूपो मोक्षदायी । अज्ञानकोपाद्यष्टादशदोषापहारी प्रत्यक्षः सर्वज्ञरूपो मन्त्रराजः । ईदृशो व्यावर्णितः । अतः पञ्चपदानि संभवन्ति । शेषा मन्त्रशुद्धिः कल्पोक्ता शुद्धा । अरिहंतत्तणे सोलसंसा । ते के सत्कर्मतीर्थकरनामलक्षणं तस्यांशाः, तैर्निर्मितानि तन्मयानि मन्त्रराजपदानि, शेषाणि पदानि वीतरागाश्रितानि, यावत्कोटयंशस्तावदणिमादयो महासिद्धयो मन्त्रराजध्यानफलमैहिकम् ।

अथ पूजाकाले प्रस्थानम्—तत् किं प्रस्थानम् ? ध्येयस्थापना ध्येयपङ्क्तिरित्यर्थः । पञ्चप्रस्थानानि नानारूपाणि ध्येयपदविभागेन प्रस्थानालिखने षट्पदो मन्त्रराजः सप्तपदो वा शेषाणि फङ्कानि मन्त्रराजपदापेक्षया । मन्त्रराजस्तु षट्कोणे ध्येयानि पञ्चैव । तदपेक्षया मन्त्रपीठमुपविद्यापीठम् । विद्यादेवताश्चेमास्ताः–किंपिसिहिआरि कालिपदोपविद्याकार्यं यदा च महाविद्याकार्यं तदा एकस्याः प्रान्ते स्वाहा, अन्यस्याः प्रारम्भे प्रणवश्चोच्चारणीयः । प्रभवादारभ्य श्रीवज्रस्वामिनं यावत् तावद्ज्ञानचतुष्टयं कोटयंशः । ततो व्यवच्छिन्नः सांप्रतमष्टोत्तरशतांशादूर्ध्वं नावलोकयति, तदेव कृतसाधनायां महानैष्ठिकेन श्रीवृषभ-चन्द्रप्रभ-वर्द्धमानकल्याणके साधनारम्भः । कुतो हेतोः ? । श्रीवृषभादारभ्य श्रीपुण्डरीकादीनां चन्द्रप्रभं यावत् तावदेकरूपो न्यासः । ततो विभिन्नरूपश्चन्द्रप्रभाद् यावद् वीरं वीरस्य न्यासो द्वात्रिंशत्श्लोकप्रमाणः । अत इदमुक्तं दुःप्रसहसूरिर्मन्त्रराजपदत्रयं पठिष्यति, तदसत्यम्, सोऽपि

पल्येव । अन्यथा ध्रुवांशा न संभवन्ति । कथं स्फूर्तिविच्छेदोऽस्य ? अज्ञानतो विक्रियाकरणतो-ऽवलेपतोऽर्हद्गुरुजिनवचनसद्गुर्वाचरणाविरोधतश्च अज्ञानं विक्रियाकरणमवलेपमनिष्टाचरणं विहाय विशुद्ध्या समणवन्दी-अर्हद्युक्तमन्त्रराजपञ्चपदानि चतुर्थीस्वामिने नम इत्यन्त-युक्तानि लक्षत्रयं जपति, स तृतीयभवे सिध्यति ।

संप्रति मन्त्रराजध्यानफलम्—अतिशयवानयं पुण्डरीकादेः श्रीऋषभसुतेन संजातः । अस्य द्वौ न्यासौ । आद्यो युगादिनाथसंयुक्तो विद्यासहस्राधिष्ठितो मन्त्रसहस्रगर्भितः । यस्य कस्यापि महानैष्ठिकस्य सूरेर्मेकल्पो मन्त्रराजः सिध्यति, तस्य विद्यामन्त्रयोः सहस्र-संख्या सिध्यति । यतश्चतुर्थीस्वामी मन्त्रराजः स्वाहान्तः । पूर्वं विद्यान्यासो दिग्मात्रेणोच्यते । श्रीआदिनाथेन ब्राह्मीसत्यकं लोकोत्तरश्चारिविद्यां(पः) संबन्धि विद्यासहस्रं श्रीबाहुबलिनः प्रकटितं प्रदत्तं च । तेन ब्राह्मी अधिष्ठात्री आचार्यस्य । तत्र प्रथमपीठे विद्यासहस्रन्यासः । पश्चात्सल्लब्धयो यथास्थानमादेशेन । चारित्रिणां पश्चात्सल्लब्धिमतां ध्यानेन विद्यासहस्रं सिध्यति । एकैकस्य लब्धिमतो ध्याने मन्त्रविद्याविंशति-सिद्धिः । भगवन्तो [1]जिन-[2]अवधि-[3]परमावधि-[4]अनन्त-[5]अनन्तानन्त-[6]सर्वावधि-[7]बीज-[8]कोष्ठबुद्धि-[9]पदानुसारि-[10]संभिन्न-[11]खीर-[12]महुया-[13]अमियासव-[14]अक्खीण-[15]आमो-[16]विप्पो-[17]खेल-[18]जल्ल-[19]सव्वोसहि-[20]वेउव्विय-[21]सव्वलद्धि-[22]उग्ग-[23]विउलमइ-[24]जंघा-[25]विज्जा-[26]पण्हसमण-[27]विज्जासिद्ध-[28]आगासगामि-[29]तत्तलेस-[30]सीयलेस-[31]तेउलेस-[32]वयणविस-[33]आसीविस-[34]दिट्ठीविस-[35]चारण-[36]महासुमिण-[37]दित्तग्गि-निसग्ग-[38]वाई-[39]अट्ठंगनिमित्त-[40]पडिमापडिवन्न-[41]जिणकप्पवन्न-[42]अणिमाइसिद्धि-[43]सामन्न-[44]सयम्भु-[45]असमत्थचक्कवट्टी-[46]उग्गतव-[47]दित्ततव-[48]चउदसपुव्वी-[49]दसपुव्वी-[50]एगारसंगी ॥ [1]चक्कि-[2]केसव-[3]पडिकेसव-[4]बल-[5]महामण्डली-[6]महाश्रेष्ठिन् ध्यानमार्गे गता लब्धयः । “ॐ ह्रीं नमो जिणाणं, ॐ ह्रां ह्रीं ह्रूं ह्रौं श्रीं क्लीं ब्लूं ऐं ह्रां ह्रीं ह्रः स्वाहा” । सरस्वती विद्या । अनया रीत्या शेषेषु चतुर्षु पदेषु एकैकं कूटाक्षरं योज्यमादरेणेत्यलेन तद्यथा—
[illegible] ॥
द्वयोः कूटाक्षरं नास्ति ।

आद्यवत् सर्वं भणनीयम् । एतेन कारणेन विद्यासंख्या । एतदन्ते बाहुबलिन्यासः । तत्रपूर्वोक्त-विशेषः । यतो विद्यासहस्रसंख्यलब्धिसिद्धो भगवान् तन्मन्त्रन्यासः । अतो महाविद्या । एत-त्प्रभावेण सर्वेषां सिद्धिः । ततस्तीर्थकृद्देशना पञ्चत्रिंशद्वचनातिशयरूपवाणीगुणैः इत्यादि महामहे, एतदन्ते बाहुबलिस्थापितपदाष्टकन्यासः । अत्र पूर्वं तीर्थकृत्स्वरूपोऽष्टोत्तरशत-पदन्यासः । एतस्माद्गुणसिद्धवाचकेन चतुर्विंशतितीर्थकरविद्याकल्पः कृतो विभिन्नः । पश्चाद् गौतमेन पदाष्टकं न्यस्तमत्र । अस्य ज्ञापकम्—

'समणे वि य सौमणसे महुमहुरे जिणवरे नमंसामि' श्रीमानदेवस्तवोऽयम् ॥

एतस्माद् बाहुबलीकुमारकाले त्रिभुवनस्वामिनी देवी उपासिका। गङ्गातटे महासामाचिकप्रपन्ना श्रीदेवी। तेन महाविद्यापीठस्य द्वे अधिष्ठातृदेवते। ततस्तीर्थकृद्-गणधर-लब्धिमदुपासिका तीर्थसमुत्पत्तौ एकावतारतीर्थकृन्नामकर्मांशोदयजातमहाप्रभावापन्नभूतपूर्वलब्धिपूर्वपरिपालितसाल्पातिचारोग्रतपसां देवीनां न्यासः। ताश्च मन्त्रराजपदसंख्याः स्युरतोऽस्य विवरणं पूर्वम्। सोऽर्हन्तरूपः। तत् पञ्चधा सप्तधा स्यात्। [1]इकि भवपरावर्त्तनरूपं भवस्थं वा। भवोऽप्येकेन्द्रियादिको न परोपतापकश्चिन्तामणि-कल्पद्रुमादिको न विकलेन्द्रियत्वं भवे भवेऽत्यद्भुतकरणत्वं निर्वाहकत्वं च लोकोत्तराणां लोकानां च। गिरीति राज्यावस्थारूपं जनसमृद्धिकरणसामर्थ(र्थ्यम्)। पिरीति दीक्षावस्थारूपं परमप्रीतिसंपादकत्वं स्थावर-जङ्गमानाम्। सिरीति कैवल्यरूपं सर्वज्ञता च। हिरीति महापूजासंबद्धं त्रिजगत्यपि अप्रतिहतशासनत्वम्। आइरीति संघरूपं मोक्षरूपं च। एतत्पदसंख्यामन्त्रपीठम्।

[न्यासविधिः—]

अत्र देवानां देवेन्द्राणां च न्यासः—इरि इरीति किरि किरीति कल्पेन्द्रन्यासः। गिरि गिरीति भवनपतीन्द्राणाम्। पिरि पिरीति व्यन्तरेन्द्राणाम्। सिरि सिरीति ज्योतिषेन्द्राणाम्। हिरि हिरीति अमलस्वामि-गणिपिटकप्रमुखेन्द्रसामानिकानाम्। आइरीति लौकान्तिकानाम्। कालः सातिशयक्रियानिष्पादनलक्षणः। सोऽस्तीत्येषां तीर्थकृतां पञ्चकल्याणकैकोना(१९)तिशयप्रातिहार्योपासना स्वर्णवृष्टिसमवसरणरचनेत्येवमादिक्रिया। आदिशब्दाद् गणधरदेवानामभिषेकाप्रतिहतशासनं अविलम्बेन तीर्थप्रवृत्तिरव्यवच्छिन्नपञ्चाचारपालकत्वं संघश्रीसंपादकत्वं धर्ममर्यादामिथ्यात्वानभिभूतत्वं गुरुत्वसंपत्तिभक्तोपधिप्राप्तिर्दुष्टराजदैवतोपसर्गस्खलनं वादिनिराकरणत्वं दुर्भिक्षकान्तारोल्लङ्घनत्वं सिद्धान्तार्थवेदनं शापानुग्रहसामर्थ्यं गुरुतपोनिर्वाहस्तीर्थश्रुतिशिष्यस्थापना। एतद्व्यवस्था एतत् सर्वं कल्याणक्रियापूर्वोक्तेन्द्रदेवानाम्। मन्त्रपीठ[ठे][2]पूर्वस्मिन् देवीनां न्यासः। आसां कार्यमिन्द्रदेवसमं नाम-विशेषश्चायम्। इरि किरि चक्रेश्वरीन्यासः। गिरीति दिक्कुमारीणाम्। पिरीति यत् तीर्थं तद्देव्याः। सिरि हिरीति नन्दा-भद्रा-जया-विजया-अपराजिताचतुर्विंशतिदेवी गौरी-गान्धारी-रोहिणी-प्रज्ञप्तीनां सर्वासाम्। आइरीति आत्मदेव्याः। कालिकालीति तीर्थंकर-गणधरनिर्वृतिगम-

---

१ तथा चाहुः—आद्ये द्वे भवरूपसौख्यजनने राज्यादि तार्तीयके तुर्यं दीक्षितभावरूपमतुलं कैवल्यरूपं परम्। पूजाकारि महत्त्वभावकलितं षष्ठं तथाऽन्त्यं पदं श्रीसंघो भगवान् महोदयपदं श्रीमन्त्रराजेऽस्त्यदः ॥१॥

२ उपविद्यायाम्।

नानन्तरं संघे जाते संगमन्य तद्धागमन्तेरुद्धरणः [illegible] । [illegible] महासाधु-श्रावकपरस्त्रीकगतिकननन्तकागः ।

तत उपविश्य 'इरियाए' इत्यादि आह. [illegible] [illegible] त्रयरूपे तीर्थान्तराले सूरीणां [illegible] । [illegible] यथा महीन्निना कुमारिनाथः [illegible] । [illegible] । गिरि सर्वगुणन्यासः । पिरि पर्वाङ्गन्यासः । [illegible] । [illegible] । आचरि एतां त्रिगतः । पूर्वकर्मकालिङ्ग-देवीनां पुनः [illegible] न्यासः । अत्र गाथो ज्ञापकः ।

किरियाए हिरियाए असंगए निरिहभावि[illegible] ।
सुहझाइए य तह मुनिणाहम्मि [illegible] ॥

अत्रापि त्रिदिवकल्याणक्रियाकारिणीनां [illegible] सूरि-साधूपासिकानां देवीनां न्यासः । [illegible] । [illegible] । [illegible] निर्वृतिदेव्यः । [illegible] शान्तिदेव्यः । [illegible] मोहिनीनाम् । आनन्दि [illegible] । [illegible] कुरुते । तेन नन्द्यादि(प)त्यकृत्याः [illegible] । [illegible] श्रुत-तपः-संघमहत्त्वख्यापनम्, दुष्टदेवीनिग्रहणम्, [illegible], रक्षणम्, अष्टाङ्गनिमित्तप्रकाशनम्, [illegible], [illegible] । [illegible] देवताधिष्ठितचैत्य-श्रुत-तपः-संघसमुद्धरणम् । [illegible] । [illegible] रैवतवत् । न्या(न)यत्र [illegible] । [illegible] दर्शनम्, चतुर्वर्णश्रीसंघस्य शाकिन्यादिक्षुद्रोपद्रव[illegible] । [illegible] मन्त्राक्षरे ३ ह्रीं ॥ अतो वर्ण्यार्थे [illegible] ।

[इति न्यासविधिः ।]

अथाचार्यमन्त्रसिद्धिः—मन्त्रराजो भगवानर्हत्स्वरूपः । कथं सूरिमन्त्रो भवति ? तत्त्वम्, गुरु-शिष्ययोर्धर्म-धर्मिणोश्चाभेदः । गुरुरर्हन्, तेनार्हत्त्वेनानुशिष्टाः शिष्या गणभृतः । अर्हत्त्वं यथावस्थितं तेऽपि जानन्ति, नान्ये । यतश्चतुरनुयोगिनस्ते तीर्थकृत्प्रश्नोत्पाद-विगम-ध्रौव्य-लक्षणासूदुन्यवच्छेदकाः स्युः । अर्हत्त्वमपि गणभृत्त्वमपि आत्मरूपम् । तत्तत्स्वरूपं ते द्वयेऽपि जानन्ति । यतः षोडशांशास्तीर्थकृतस्त्रयोदशांशा गणभृतः द्वयोरियदन्तरं षोडश-त्रयोदशांशाः स्कन्धरूपपुद्गलास्तीर्थकरनामकर्मसंबद्धोदयेनार्हत्त्वं गणभृत्त्वं च सर्वज्ञतातुल्या सिद्धिश्च । परं निश्चयतोऽर्हत्त्वे गणभृत्त्वे व्यवहारः । सोऽत्यन्तं बलवानर्हतामपि । गणधरकृतमर्हन्तोऽपि न

याधन्ते। आइरीति संघरूपं मोक्षरूपमर्ह-त्वमुक्तम्। संघाद्यो गणभृत्। तस्मादाचार्यमन्त्रः। अतोऽर्ह-त्वसिद्धिर्व्याख्यायते पूर्वम्। पश्चादाचार्यपरम्परा। अस्य चतस्रो वाचना। महती बृहती उक्ता न्यासी। गणभृतामाद्यतीर्थे स्वयंसिद्धो मन्त्रस्तेन महती बहुसिद्धिः। अनन्तरं या पश्चाज्जायते पूर्णा सा बृहती। गौतमी तु उक्ता। चतुर्दशपूर्विणां यावत् सातिशयः कालः। न्यासी मानदेवीलब्धिपदानि त्रीणि चत्वारि पञ्चपदानि। एकस्मिन् पदे न्यस्यन्ते सा न्यासी। यदा पदानुसारिणीं विना न पूर्वाणि चउदसपुव्वीणं। अनया रीत्या पञ्चाशत्। यथा यथाऽतिशयहानिस्तथा तथा पदहानिः। अत्र स्तवो ज्ञापकः—

"आयरियमेरुपयमवि साहंते सूरिणो वंदे"

तत् कथं लब्धिमन्तः साधवो ध्यायन्ते। पूर्वं तद्ध्याने सारस्वतादिसिद्धिः। अर्ह-त्वं गणभृ-त्वं यथाख्यातचारित्रेण, क्षायिकज्ञान-दर्शनेन लब्धीरनुभूय पूर्वभवे पश्चादर्ह-त्वं गणभृ-त्वं स्याद्, अतोऽपि साधवो ध्येयाः। सिद्धत्वं तेषामेव। अर्ह-त्वगणभृ-त्वा(-त्व)साधनाद्वितीयम्। अत्र स्तवो ज्ञापकः—

इयमंतपयसमेया थुणिया सिरिमाणदेवसूरीहिं।
जिणसूरिसाहुणे सइ दिंतु थुणंताण सिद्धिसुहं॥

यस्यामवस्थायां यो ध्येयो ध्यायते तत् फलम् [इति] तात्पर्यार्थः॥ छ॥

[इत्याचार्यमन्त्रसिद्धिः॥]

अथात्मगुह्यम्—

भविष्या वर्त्तमाना ये सूरयः स्व-परगच्छगाः।
पतित्वापादयोस्तेषां तान् विज्ञपयाम्यदः॥ १
सर्वसावद्यसेव्यस्मि तादृग्विद्यागुरुर्न मे।
तादृग्मन्त्रगुरुर्नाभूत् हतो लिङ्गोपजीवकः॥ २
एवंविधोऽपि जिज्ञासुर्जातो भगवदागमे।
नामाचार्यपदप्राप्तः किञ्चिज्ज्ञः कर्मयोगतः॥ ३
आगामिबोधिलाभाय कदा शत्रुञ्जये गतः।
दुःख-कर्म क्षपयितुमादिनाथं विवन्दिषुः॥ ४
सिद्धिक्षेत्रे स्थितो ध्यायन् युगादिजिनपुङ्गवम्।
मन्त्रस्वरूपजिज्ञासुस्ततो जातो ह्युपोषितः॥ ५

चतुर्विंशाक्षराप्तिर्जातेयं पञ्चमे दिने ।
तत ऊहं कुर्वतो मे तत्राविर्भूतमीदृशम् ॥ ६
तत्र प्रश्नाक्षरं जातं प्रश्नाक्षरप्रमाणतः ।
ईदृशं गदितं सर्वं न वेद्मि किन्तु तत्त्वतः ॥ ७
मदीयं वितथं वाक्यं सत्यं वेत्ति न विज्ञते ।
प्रायः प्रमादयुक्तानां दुःखमायामहं नृपः ॥ ८
स्वल्पमस्य विज्ञाय क्रियतां यद् विरोचनं ।
मिथ्या मे दुष्कृतं चास्तु मा भूदाशातना क्वा ॥ ९

यथातत्त्वं वृद्धा सिद्धसमक्षं गीतार्थैस्तत्क्षमालोचना ॥ छ ॥

स्वाहाहोमतत्त्वमत्यार्थम्—यदक्षमुष्टित्रयं तद् त्रिभुवनव्यवहारतत्त्वम्; मुष्टिप्रायो जगद्व्यवहारः जिनशासनत्याधन्तरिक्षो होमकुण्डचिन्ता । वाच्छेदो होमव्यद्रव्याणि । पूर्वं जपो होमश्च नित्यसावेनत्याकृतां(तं) द्वादशकुण्डाक्षरत्याधस्ता द्वादशास्काल्दक्षरूपो यतोऽक्षररूपो कालः । यत्त्यप्रमाणितं पञ्चम् । षष्टिपदाः कलाः । कूटाक्षराणि न ध्याने, पूजायां ध्यायन्ते । तेन श्रीमान्देवद्वादशपर्दी स्तुतावेव मन्त्राक्षराणि । मन्त्रपीठ—मन्त्राक्षराणि कल्पोक्तानि । पञ्चभूतात्मिका क्षिप ॐ स्वाहा आत्मरक्षा । पञ्चशून्यात्मिका च ह्रां ह्रीं ह्रूं ह्रौं ह्रः । अन्यत्सर्वं न गुरोर्कथितम् । स्वसंवेदनतो ज्ञातं कूटाक्षरवेदनं सद्गुरोः । देवतादेवतः । पूर्वं शतत्रयं श्लोकसंख्या । एवंविधो गौतमन्यासो द्वात्रिंशत्श्लोकप्रमाणः । अष्टोत्तरविद्यादलकलितः । सांप्रतं विद्याष्टकगर्भितः । विद्यापीठं विद्या-उपविद्यामन्त्रपीठं मन्त्रराजः । एतेषां व्यवहारमार्गो न्यासः सदाम्नायेन ।

गौतमस्वामिमन्त्रोऽयं सम्यगाराधितो नरैः ।
चिन्तामणिरिवाजस्रं चिन्तितार्थप्रभावकः ॥ १
शान्ति(श्रय)कल्याणाय विश्वातविनाशिने ।
नमोऽस्तु मन्त्रराजाय विश्वश्रीप्रदायिने ॥ २
या च लोके महासिद्धिर्या च लोकोत्तरे मता ।
संपद्यते स्फुटं या सा मन्त्रराजस्तवस्मृतौ ॥ ३
अतीतानागता ये च ये जिनेन्द्राश्च संप्रति ।
ते सर्वे वन्दिता नित्यं मन्त्रराजस्तवस्मृतौ ॥ ४

गौतमेन कृतः पूर्वं तेन गौतम उच्यते ।
सुधर्मस्थापितस्तीर्थे सुधर्मा तेन संप्रति ॥ ५
यावत् त्वं वर्त्तसे नाथ ! तावत् तीर्थकृदागमः ।
तावज्ज्ञानं सभेदं च तावत् तीर्थप्रवर्त्तना ॥ ६
सर्वदेवमयोऽसि त्वं पुरुषोत्तममयोऽसि च ।
तव त्रैलोक्यनाथत्वं मन्त्रराज! तव प्रभो! ॥ ७
ध्रुवं तीर्थकरोऽसि त्वं ध्रुवं गणधरोऽसि च ।
भवेऽत्र वर्त्तमानोऽपि स्वर्गो मोक्षोऽसि पुण्यदः ॥८

सिद्धाष्टकमिदं श्लोकद्वयं गुरुभिर्दत्तं श्लोकपट्कमादेशेन। किञ्चज्ज्ञातं श्रीशङ्खेश्वरप्रभुश्रीपार्श्वनाथादेशेन, सर्वं प्रभूतं पुण्डरीकादेशेन। यद् गुरुणा दत्तं तत् तस्य प्रमाणम्। आत्मसंवेदनार्थं निगदितम् ॥

[इत्यात्मगुह्यम् ॥]

इतोऽनन्तरगणधरवलयमन्त्रः—प्रत्यन्तरे स च लघुपत्रेषु वाच्यः। वैखरी मध्यमा पश्यन्ती पराभापाभेदाश्चत्वारोऽस्य। वैखरी स्पष्टोच्चारणम्। मध्यमा सर्ववर्णस्थानव्यापकत्वम्। पश्यन्ती अर्धदृष्टिः। परा ध्वनिवर्जितसर्ववर्णस्थानास्पर्शनम्। अनया रीत्योच्चारणीयः ॥ छ ॥

मन्त्रजातिश्चतुर्धा–आणव-कार्मज-प्रवर्त्तक-निवर्त्तकाः। आणवाः सत्कर्मबीजम्। कार्मजा सत्कर्मोदयः। प्रवर्त्तका सत्कर्मप्रवृत्तिः। निवर्त्तका मोक्षः। चतुर्जातीयो मन्त्रः यावन्मात्रः कर्मक्षयोपशमस्तावन्मात्रा सिद्धिः। अतश्चतुःपीठयुक्तो मन्त्रराजो [1]ध्येयः। ईदृशं एतत् सर्वं मयाऽऽदेशेन निगदितम्। यदि सत्यं तदाऽस्तु मे दुःकर्मक्षयाय भव्योपकाराय। अथासत्यं तदा मिथ्यादुष्कृतम्। न जातु प्रायश्चित्तमनन्तसंसारित्वं दुर्लभबोधिबीजत्वं यतो मयाऽशठेन रचितमिदम्। ईहा-समीहां विना श्रीपुण्डरीकादेशेन यदत्र मध्येऽस्ति तज्जातम्। परिभावयन्तु गीतार्थाः, मा कुप्यन्तु। अन्तःकरणशुद्ध्या चोक्तं शील-संयम-चारित्रविहीनोऽहम्। कथं संप्रीणितो भगवता, एतन्न ज्ञातं न ज्ञायते। पञ्चमोपवासेन समादिष्टमेतदवितथम् जैनो धर्मश्च विजयताम्।

श्रीदेवाचार्यगच्छसमुद्भूतसूरिशिष्यलवलवेन रचितं विद्याकल्पसंग्रहे दुर्गपदविवरणं समाप्तमिति ॥ ग्रन्थाग्रम् २३८ ॥

---

१ कर्मक्षयकारित्वात् ॥

[मन्त्राम्नायः]–

"ॐ ह्रां क्षां नमो अरिहंताणं। ॐ ह्रीं क्षीं नमो सिद्धाणं। ॐ ह्रूं क्षूं नमो आयरियाणं। ॐ ह्रौं क्षौं नमो उवज्झायाणं। ॐ ह्रः क्षः नमो लोए सव्वसाहूणं। इति महामन्त्राक्षरगर्भितं पञ्चपरमेष्टि[न्]! आपदं हन हन, संपदं उपनय उपनय, शत्रुं स्तम्भय स्तम्भय स्वाहा"। १०८ वारस्मरणा। अथवा वार २१ शान्त्यर्थे श्वेतध्यानम्॥ १, वशार्थे रक्तध्यानम्॥ २, लक्ष्म्यर्थे पीतध्यानम्॥ ३, नीलध्याने विषं याति। मुक्त्यर्थे पञ्चवर्णम्॥

"ॐ वज्रगन्धारीमहाभैरवी हन हन, दह दह, पच पच, मथ मथ, सर्वभूतान् आकर्षय आकर्षय। सर्वशत्रून् वशं नय, सर्वदुष्टान् निवारय। सर्वजनप्रियो भवामीति ह्रां क्षां ह्रीं क्षीं ह्रूं फट फट् स्वाहा"। सर्वजनप्रियङ्करो मन्त्रोऽयं व्याख्याने स्मरणीयः। वार १०८॥

"ॐ नमो भगवते पार्श्वनाथाय ह्रीं धरणेन्द्राय सप्तफणविभूषिताय सर्वज्वरं सर्ववातं सर्वलूतं सर्वदुष्टं सर्वविसं (षं) सव्वस्स रोगं नाशय त्रासय छिन्दय भिन्दय। यः यः रः रः हुं फट् स्वाहा"॥ छ॥

सर्वकर्मकरो मन्त्रः॥ १२, अनेन उव्जकम्, कालापानीयं च क्रियते॥

"ॐ नमो भगवते देवश्रीपार्श्वनाथाय ह्रीं धरणेन्द्र-पद्मावतीसहिताय अट्टे मट्टे दुष्ट-विघट्टे क्षुद्रान् स्तम्भय स्तम्भय, दुष्टान् निग्रह निग्रह, उपद्रवान् छिन्द छिन्द स्वाहा"। वार ७ अथवा २१ अथवा १०८ स्मरणीयन्ते॥

अज्ञातसूरिकृतः

सूरिमन्त्रकल्पः

ॐ ह्रीँ नमो मन्त्रगुरुपादुकाभ्यः ॥

सिरिसूरिमंतपवरे जे सिद्धा सुयपवुड्ढिसंजणगा ।
तव्वयणसंगहो मे वण्णिजइ तप्पए नमिउं ॥१

१जिण-२ओही-३परमोहि-४अणंतोहि-५अणंताणंतोहिजिण।
६केवलि-७भवत्थकेवलि ८अभवत्थि य केवलीणं च ॥ १ ॥
९उज्जुमई १०विउलमई ११वेउव्वियलद्धि-१२सव्वलद्धीणं ।
१३पण्हासमणाण तहा१४ जंघाचारणमुणीणं च ॥ २ ॥
१५विज्जासिद्धाण तहा १६आगासगामीण तह य निच्चं पि ।
१७आमोसहि-१८विप्पोसहि-१९खेलोसहि-२०जल्लोसहीणं च ॥ ३ ॥
२१सव्वोसहि-२२आसीविस-२३अट्ठंगनिमित्तधारयाणं च ।
२४वयणविस२५तत्तलेसाण पणमिमो २६सीयललेसाण ॥ ४ ॥
२७चउदस-२८दसपुव्वीणं २९एगारसअंगसुत्तधारीणं ।
३०संभिन्नसोयाण तहा ३१दुवालसंगीण सव्वासिद्धाणं ॥ ५ ॥
३२उग्गतवचारीणमेव बत्तीसत्थुइपयाणं च ।
आइम्मि नमो ॐ ह्रीँ पढमपयाओ छट्ठिबहुवयणं ॥ ६ ॥

पढमा वायणा ॥ छ ॥

१खीरासव-२महुआसव-३अमियासवलद्धियाण पत्तेयं ।
४अक्खीणमहाणसठियाण ५संभिन्नसोयाण ॥ ७ ॥
तत्तो ६पयाणुसारीलद्धीणं तह य ७बीयबुद्धीणं ।
तत्तो य कुट्ठबुद्धीणं सव्वपया ॐ नमो पुव्वं जिणओहिं ॥ ८ ॥
आरब्भा जाव य वेउव्विलद्धिपययं च ।
१चउदस-२दसपुव्वीणं १तव-२मण-३एगारसंगीणं ॥ ९ ॥
ए ए चउवीसपए नायव्वे सूरिणा पव्वरमंते ।

मायावण्णविरहिए नूणमुवरिज्ञिए निच्चं ॥ १० ॥
बीया वायणा ॥छ॥

ध्यानविशेषमाह—

सुक्कज्झाणेणेसो कम्मक्खयकारणे परममंतो ।
झायव्वो तिक्कालं निच्चं परमिट्ठिमुद्दाए ॥१॥
किं सुयसुयमुवहणं झाणं वरिऊण [1]जोणिमुद्दाए ।
विज्जंसो सोहग्गं पावइ य [2]जइण जोग्गणं ॥२॥
उत्ततकणयवण्णं झाणं वरिऊण सुभगमुद्दाए ।
जो झाइ सूरिविज्झं(ज्जं) तस्स वसे तिहुयणं सयलं ॥३॥
सजलजलवाहकालं झाणं वरिऊण चक्कमुद्दाए ।
जो झाइ सूरिविज्झं(ज्जं) तस्स खयं जाइ रिउवग्गो ॥४॥
चक्कवट्टिमहारायस्स वसीकरणाइयं छक्कम्मं ।
एयस्स मन्तस्स पभावओ संभवइ अहवा तिओलु(तिलु)क्कस्स ॥५॥
एकं उद्दिसिउं पउंजेउं नारिहइ हरीमियहणणं ।

केण पसंसिज्झइ एयम्मि मंतम्मि छक्कम्म साहणीओ विज्जाओ भणन्ति । पुव्वं विज्जाविभागं जाणिऊण एयंसि नमो सिज्झइ विद्यापीठं ॥

ॐ नमो वाहुवलिस्स पण्हसमणस्स ॐ वग्गु निवग्गु समणे सोमणसे महुमहुरे स्वाहा ॥ इति महाविद्या ॥

इरि कालि किरि कालि पिरि कालि हिरि कालि स्वाहा ॥ विद्या ॥

इरियाए किरियाए पिरियाए सिरियाए हिरियाए कालि कालि महाकालि स्वाहा ॥ उपविद्या ॥

ॐ किरि किरि कालि पिरि कालि सिरि सिरि कालि हिरि हिरि कालि आयरिय कालि स्वाहा ॥ मन्त्रपीठम् ॥

ॐ किरि ॐ पिरि ॐ सिरि ॐ हिरि ॐ आयरिय मेरु ॥ महामन्त्रः ॥

परमेष्ठिमुद्रया सर्वोऽप्येष शुक्लध्यानेन लक्षमेकं वातव्यः । तथा सौभाग्यमुद्रया पीतध्यानेन सौभाग्यार्थं महु महुरे इति यावद् ध्येयः । सहस्रषोडशजापः कार्यः । इरियाए इत्यादि किंशुकरक्तध्यानेन पर्वतमुद्रया वश्यार्थं ध्येयः, उपविद्या १२००० जापः । अन्त्यमन्त्रस्तु चक्र-

१ पद्मिनीयोनौ । २ जुर्वईन ॥

मुद्रया रिपुक्षयार्थम्, कृष्णध्यानेन मासं यावद् ध्येयः। अष्टोत्तरशतं १०८ दिने मन्त्र-राजस्य कर्मक्षयार्थं स्मरेत् ॥

इयाणि मंतस्स विवरणं, झाणविहीय भण्णइ—

मेरु सद्देण अरिहंतत्तणं वुच्चइ । अरिहंत त्तणेणं अरिहंता जहा चक्केण चक्की, रज्जेण राया। अरिहंतत्तणे सोलस अंसा। अंशानां स्थापना तत्तं केवलिणो जाणंति। सव्वे गणहारिणो तेरसंसा तेण तित्थयरनाणुप्पत्तीए सुयलद्धी हवइ। तेसिं सामन्नभवा भवत्थाण केवलिणं च। ओहि-परमोहि-सव्वोहि-अणंताणंतोहिजिणा एगारसंसा । उज्जु-विउलमइणो खीरमहुआ अमया[पया ?]सवलद्धिणो य सव्वे दसंसा, तेण एएसु जिणसद्दो पयट्टइ । वाइणो महानिमित्तिणो विज्जासिद्धा तवस्सिणो य चउद्दस-दस-पुव्विणो अट्ठंसा, तेण एएसु तिकालविसयं नाणं पवत्तइ। अट्ठंसा संसारमग्गिणो मुक्खमग्गिणो य भणिया । सोलस-तेरसंसा दसंसा एगारसंसा मुक्खमग्गिणो नूणं । अरिहंतत्तणं मुक्खतरु-बीयभूयं अरिहंता अंकुरा ॥ सेसा साहूपसाहव्वाणिया । अतः कारणात् मेरुरूपे[1] मन्त्रराजे स्मर्यमाणे जिनप्रभा भवति । जिनेन्द्रस्य परिवारो गणधरादयः । दोषनिग्रह[2] इति दोषशब्देन अष्टादश दोषा अज्ञानादयः । मेरु इत्यक्षरस्यानेकधा व्याख्या दिग्मात्रमिदम् । तत्त्वं तत्त्वविदो जानन्ति । अर्हन् स्तुत्यगुणसंपूर्णो भगवान् । तेन स्तुतिपदानि भगवतामृद्धिस्थानीयान्युक्तानि ॥ इरि किरि सिरि हिरि इति विद्यादेवता वीतरागगुणाश्रिताः । नामसादृश्यमन्त्ररूपाः पृथक्-कर्मसंपादकाः । तेनैकोनविंशत्यतिशयप्रातिहार्यस्थानीयाः । विद्यापदानि वग्गु वग्गु इत्यादि पञ्चदशसंख्यानि वीतरागस्तुतिरूपाणि विद्याप्रवादपूर्वादर्थो ज्ञेयः । पूर्वाणि संस्कृतभाषया । यदा ईप्सितकर्मणि ध्यानं तदा विद्योच्यते । पूजाकाले प्रस्थानमुच्यते । मोक्षार्थे पीठमुच्यते । चतुःपीठस्वामी मेरुरूपो महामन्त्रः । विद्या विभागपदसंज्ञा ॥ छ ॥

ध्यानमनया रीत्या कर्त्तव्यम्—रागता संसारमूलम् । वीरागता मोक्षमूलम् । राग-स्थानीये वस्तुनि ध्यायमाने । संसारो यथाहि तथाहि मोक्षो वीतरागे ध्यायमाने । यथा वीतरागस्य त्रिभुवनप्रभुत्वं भवति तथा वीतरागविद्येयं त्रिभुवनवश्यादिषट्कर्मकारिणी मोक्ष-कारिणीति । एवं ज्ञात्वा सर्वस्तुतिपदप्रारम्भे विद्याविभागप्रारम्भे च ॐमिति सर्वलोकस्यात्मनश्च शान्ति-पुष्टि-ऋद्धि-वृद्धि-स्फूर्ति-शिवायोच्चारणीयः । ह्रीं वश्यार्थे । श्रीं ज्ञानार्थे । युगपन्नोच्चार-णीयानि इति सबीजध्यानम् । एभिर्विना निर्बीजं स्यात् तत् केवलं मोक्षाय ॥ छ ॥

ॐ नमो जिणाणं स्नानम् १, ॐ नमो ओहिजिणाणं विलेपनम् २, परमोहिजिणाणं माला ३, अणंतोहिजिणाणं मुकुटु-(टम्) ४, अणंताणंतोहिजिणाणं तिलकम् ५, केवली ६-

---

१ आर्हन्त्यरूपे । २ वक्ष्यमाणमिदम् ।

भवत्थकेवली कुण्डल [म्] ७, अभवत्थकेवली ग्रैवेयम् ८, चउदस ९–दसपुव्वीणं अङ्गद [म्] १०, एगारसंगीणं हारु (रः) ११, ॐ नमो कुट्ठबुद्धिणं १२, बीयबुद्धिणं केयूरवरमुद्रा १३, ॐ नमो उग्गतवचारीणं सितवस्त्रम् १४, ॐ नमो गोयमस्स महादाणस्स[1] लब्धिचिन्ता १५, ॐ नमो सुहम्मसामिणो गणचिन्ता १६, सव्वेसिं एएसिं सौभाग्यप्रभा १७, ॐ नमो बाहुबलिस्स केवलज्ञानम् १८ ॥

ॐ वग्गु वग्गु महुरे प्राकार [ः] १, इरि कालि पिरि कालि पद ४ प्राकार [ः] २, इरियाए इत्यादि पद ६ प्राकारः ३, ॐ इरि इरि कालि किरि किरि पिरि पिरि सिरि सिरि पद ४ हिरि हिरि पद ५ आयरिय ६ पाडिहेरचिन्ता किरि मेरु ७ जिनप्रभाशोभः दोपनिग्रहः [2]कल्याणत्रिकमयं ध्यानम् ।

ध्यानविधिः समाप्तः ॥

इदानीं साधनाविधिरुच्यते—

यस्मिन् देशे स्व-परचक्रोपद्रवो न भवति, यत्र राजा चक्री वा स्वयं राज्यं करोति, यत्र नो दुर्भिक्षम्, यत्र तीर्थम्, यत्र भूमी रम्या काचित्, तत्र देशे गत्वा गुरोरनुज्ञां गृहीत्वा श्री–ह्रीप्रधानजनसंकुले क्षेत्रे वसित्वा उत्तराभिमुखमन्दिरे निःशल्ये समेति स्तोकजनप्रसरे वसित्वा सर्वविकृतीर्विमुच्य सहस्रपत्रकमले गौतममालिख्य ॐ क्रौं ह्रीँ श्रीँ अनेनाहूयात्मरक्षापूर्वं करजापो लक्षमानः कर्त्तव्यः । ब्रह्मव्रतं त्रिधा विशुद्धं विधाय जिनवन्दनं विनाऽन्यत् पाठादिकं कर्म नो विधेयम् । वर्द्धमानजिनजन्म-ज्ञानकल्याणकं(क)दिने चन्द्रप्रभ-वृषभयोरथवान्येषां न हि । अथवा महाशालिभक्तं घृतपुराःपक्वान्नं गोदुग्ध-द्राक्षापानम् । उभयकालस्नानम्, शरीरे सुगन्धिविलेपनम्, कृष्णागु (ग)रु कर्पूरपूजां विधाय पुष्पितफलितोद्याने द्वात्रिंशत्सहस्रपुष्पजापो विधेयः । पद्मासनं विनाऽन्यासने नोपवेष्टव्यम् । ततः सिद्धो भवति । साधनाधिप्राकारैव । अन्यः प्रकारो नास्ति ॥ ठ ॥

इत्थंतरे तइया वायणा भण्णइ—

रोगाइरिउजईणं, नमो जिणाणं नमो महं होउ ।
एवं ओहिजिणाणं, परमोहीणं तहा तेसिं ॥१॥
एवमणंतोहीणं, णंताणंतोहिज़ुयजिणाण नमो ।
सामन्नकेवलीणं, भवाभवत्थाण तेसिं तहा ॥२॥
उग्गतवचरणच(चा)रीणमेवमित्तो नमो होइ ।
चउदस-दसपुव्वीणं, नमो तहेगारसंगीणं ॥३॥

---

१ महादानं दीक्षाभिषेकः । २ जन्म-दीक्षा-ज्ञान [म्] ।

एएसिं सव्वेसिं, एवं काउं अहं नमोकारं।
जमियं विज्जं पउंजे, सा मे विज्जा पसिज्झिज्जा ॥४॥

निच्चं नमो भगवउ बाहुबलिस्सेह पण्हसमणस्स।
ॐ वग्गुं वग्गुं निवग्गुमग्गंगयस्स तहा ॥५॥

समणे विय सोमणसे, महुमहुरे जिणवरे नमंसामि।
इरि काली पिरि काली, सिरि काली तह महाकाली ॥६॥

किरियाए हिरियाए, असंगए तिविहकालयं विरए।
सुहसाहए य तह मुत्तिसाहए साहुणो वंदे ॥७॥

ॐ किरि किरि कालिं पिरि पिरि कालिं च सिरि सिरि कालिं।
हिरि हिरि कालि पयंपिय, सरि य सरि य आयरिय कालिं ॥८॥

किरि मेरुं पिरि मेरुं, सिरि मेरुं तह य होइ हिरि मेरुं।
आयरियमेरुं पयमवि, साहंते सूरिणो वंदे ॥९॥

इयमंतपयसमेया, थुणिया सिरिमाणदेवसूरीहिं।
जिणसूरिसाहुणो सइ, दिंतु थुणंताण सिद्धिसुहं ॥१०॥

अक्षरस्थापना—

नमोयुक्त आद्यपद १२, ततो विभक्त्यन्तद्वितीयपद १२, तदन्यतृतीयपद १२, ततोऽपि चतुर्थपद १२, ततोऽपि पदमेकं एवं सर्वपदसंख्या ४९। तत्र प्रथमद्वादशाङ्के द्वादशसु पदेषु प्रत्येकमक्षराणि यथा [1]५। ७। ९। ९। ११। ९। ९। १०। १२। ९। ७। ८ एवं सर्वाक्षरसंख्या १०५। तथा द्वितीयद्वादशपदेषु प्रस्थापना [2]३। ३। ४। २। १। २। २। ४। १। १। २। ४ एवमक्षरसंख्या २९। तथा तृतीय-द्वादशके द्वादशपदस्थापना [3]७। ५। ६। ५। ६। ३। ४। ५। ४। ४। ४। ४ एवं सर्वाक्षरसंख्या ५७। चतुर्थद्वादशके द्वादशपद-

१ नमो जिणाणं। नमो ओो। नमोऽणं०। नमोऽणंताणंतो। नमो सामन्न०। नमो भवत्थ०। नमो उग्गतव०। नमो चउदस०। नमो दस०। नमो एगारसंगीणं ८॥ २ एएसिं सव्वेसिं नमोकारं किज्जा। जमियं बिज्जं पउंजामि सा मे विज्जा पसिज्झउ॥

३ ॐ नमो भगवओ बाहुबलिस्स पण्हसमणस्स ॐ वग्गु वग्गु निवग्गु मिवग्गु सुमणे सोमणसे महुमहुरे इरि काली पिरि काली सिरि काली हिरि काली॥

स्थापना [1]४। ४। ७। ६। ६। ६। ६। ४। ४। ४। ४। ६ एवं सर्वाक्षरसंख्या ६१। एकस्मिन् [2]पदेऽक्षर २ एवं सर्वपदेषु सर्वाक्षरसंख्या २५२ द्विशतीद्विपञ्चाशदधिका। श्लोकमानेन श्लोक० ७ अ० २८ प्रणवाद्यानि ३ पदान्यत्र विशेषविद्याभागः। पुनरयं पसिज्झिज्जा एतदन्ता सर्वकार्यप्रसाधिका विद्या १। पण्हसमणस्स एतदन्ता स्वप्नविद्या २। ह्रिरियाए एतदन्ता सोहग्गकरी वग्गुविद्या ३ ॥

तथा गौतमस्याक्षराणां शतानि २१ प्रदत्तानि। पूर्वं भगवदाज्ञया श्रीगौतमेन द्वात्रिंशत् श्लोकप्रमाणः कृतः। कालदोषाद्धीयमानो जातः। दुःप्रसहसूरिः अष्टौ श्लोकान् पठिष्यति। इह च सौभाग्य-परमेष्ठि-ज्ञान-सुरभिकृताञ्जलिमुद्रापञ्चकं ध्याने। आह्वानन-स्थापन-संनिधापन-संनिरोध-अवगुण्ठन ५ इति मुद्रापञ्चकं सर्वस्यापि ध्येयस्य दर्शनीयमादौ ॥ ० ॥

तइया वायणा सम्मत्ता ॥

इदानीं प्रस्थानविधिरुच्यते—

प्रथमं विद्यापीठम्। द्वितीया विद्या। तृतीया उपविद्या। चतुर्थो मन्त्रः। पञ्चमः श्रीमन्त्रराजः। स्तुतिपदानि यावन्ति तावन्ति भवन्तु। पूजाकाले पूजार्हा द्वादशपदी अष्टादशपदी चतुर्विंशतिपदी द्वात्रिंशत्पदी लेख्या। विद्यापीठं षोडशवलके लिख्यते। सप्रणवद्वादशपदीकं पसिज्झउ स्वाहा एतदन्तं प्रथमं प्रस्थाने सप्रणवाक्षरसंख्या १४६। यदाष्टादशपदी तदा तृतीय-चतुर्थवलके द्वे पदे, पञ्चम- षष्ठे द्वे पदे। नवम-दशमवलके द्वे पदे। अन्त्यालापः समग्रोऽन्तिमवलके तदाक्षरसंख्यैषा १९२। तस्मात् द्वितीयप्रस्थाने सप्रणवस्वाहालाञ्छित अक्षर ४० विभक्त्यन्तपद ११। अक्षर ३। ४। ५। ६। ५। ३। ?। ४। २ वृत्ताकार ओल्यां लिख्यते। तृतीयप्रस्थाने अक्षरपदसंख्या—पद १९ प्रत्येकमक्षराणि ५। ६। ३। ४। ५। ४। ४। ४। ४। ४। ४। ४। ४। ४। ४। ४। ४। ४। ६ एवं सर्वाक्षराणि ८१ [3]षोडशवलकैर्लिख्यते(न्ते)। ततश्चतुर्थप्रस्थाने पद ७ प्रत्येकमक्षराणि ७। ६। ६। ६। ६। ६। ८ सप्रणवस्वाहापर्यन्तसर्वाक्षर ४५ वृत्ताकारओल्यां लिख्यते। पञ्चमप्रस्थाने विरामसहितपद १३ प्रत्येकमक्षराणि ४। ६। ४। ६। ४। ६। ४। ६। ४। ६।। ४। ६। ८ एवं सर्वत्र ६८ मध्ये षट्कोणं कृत्वा लिख्यते। अन्त्यपदं मध्ये शेषाणि एकमेकं कोणे एकमेकं बहिर्यथाक्रमेण।

---

१ किरियाए हिरियाए उँ किरि किरि कालि पिरि पिरि कालि सिरि सिरि कालि हिरि हिरि कालि आयरिय कालि किरि किरि मेरु पिरि मेरु सिरि मेरु हिरि मेरु आयरिय मेरु ॥

२ स्वाहा ॥

३ फट्कैः।

समग्रसंख्यामीलने अक्षर ३८० श्लोक ११ अक्षर २८ द्वादशपदप्रस्थानम् । यदाष्टादशपदीकं षट्कोणवहिर्भागे क्रमेण षडेव मेरवः इरि मेरुं वर्जयित्वा षट्कोणमध्यकोणे ह्स्क्लौँ ह्स्क्लीँ ह्स्क्लाँ पाठः । ह्स्क्लैँ ह्स्क्लूँ ह्स्क्लुँ फ्रूँ एषामक्षराणां स्थापना क्रियते । षट्कोणमध्यभागे ॐ ह्रीँ अर्हँ चतुष्पीठस्वामीने नमः इत्यालिख्यते । सामान्येन सर्वाणि पदानी ॐ ह्रीँ स्वाहा उच्चारणीयानि । सप्तपदेषु विशेषोऽयम्—ईँ क्ष्रौ क्षाँ क्ष्रीँ ग्राँ ग्री ग्राँ ग्री स्त्राँ स्त्रीँ ह्राँ ह्रीँ इरि कालिए तेषु पदेषु यथाक्रमेण योजनीयानि । शेषं तदवस्थामेव ॥

इति सूरिमन्त्रगर्भितविद्याप्रस्थानपटविधिः समाप्तः ॥

इदानीं मन्त्रशुद्धिर्भण्यते—

यावन्ति पदानि मन्त्रराजे तावन्ति तान्येव तादृशानि कालि कालि युक्तानि मन्त्रपीठे २ । यावन्त्येव मन्त्रपीठे तावन्त्येवोपविद्यायाम्, किरियाए इत्यादि उच्चार्यमाणायाम् ३ । यावन्त्येवोपविद्यायां तावन्त्येव वग्गु वग्गु सुवग्गु महावग्गु निवग्गु इत्यादि आद्यपञ्चदशपदसहितानि तादृशान्येकवारोच्चार्यमाणकालीयुक्तानि सौभाग्यविद्यायाम् ४ । स्तुतिपदानि वाचनाविशेषज्ञातव्यानि । साऽपि पञ्चधा । पूर्वं गौतमवाचना । ततः श्रुतकेवलिवाचना ज्ञानप्रवादपूर्वात् प्रभवेन कृता । तदनन्तरं वज्रस्वामिवाचना । तेन वर्धमानविद्या । चत्वारि स्तुतिपदानि पञ्चपरमेष्ठिपदानि च गृहीत्वा उपाध्यायत्रयोग्या विभिन्नीकृता । वीरे वीरे इत्यादि पदानि सौभाग्यविद्योपविद्यामध्यादुद्धृत्य हूं ह्रः ह्रौँ आलीढानि ॥ छ ॥

तदनन्तरं नागेन्द्र—चन्द्र—निर्वृति—विद्याधरवाचनाः । ताश्च प्रवर्त्तन्तेऽद्यापि । तेषां भगवतामपि किञ्चिन्मात्र विभिन्ना विसदृशा जाताः । सा च मेरुसंख्याविशेषणज्ञातव्या । पूर्वं मेरुनामानि । इ १ कि २ गि ३ पि ४ फि ५ चि ६ सि ७ हि ८ वि ९ मि १० आ ११ अंते रि इति ।

गौतमवाचनायां एकादशमेरवः ११ । श्रुतकेवलिवाचनायां दश १० । वज्रस्वामिवाचनायाम् ९ । नागेन्द्रादिवाचनायाम् ९ । ८ । ७ । ६ । ५ । नवाष्टौ सप्त षट् पञ्च । नवाष्टसंख्या व्युच्छिन्ना एत्र । नवाष्टसंख्यानां मेरूणां ग्रन्थन-संदर्भण-अवगुण्ठन-संपुट-संपल्लव-संनिरोधन एतानि अक्षराणि तिष्ठन्ति । अतो विच्छित्तिः । एतान्यक्षराणि विचित्राकारतया उच्चारयितुं न शक्यन्ते । द्वितीयं व्युच्छित्तिकारणम् । षट् सप्त पञ्च प्रवर्तिष्यन्ते । चन्द्रवाचनायां सप्त पञ्च च । विद्याधरवाचनायां षट् । नागेन्द्रवाचनायां पञ्च १ । एवं क्रमेण हीयमाने काले श्रीदुःप्रसहसूरिमेरुत्रयं पठिष्यति । आत्मीयगच्छगुरौ विपन्ने गच्छान्तरीयसूरिणा स्थापितानां भविष्यमानसूरीणां विसदृशा वाचना संजाता । स्तुतिपदान्येतानि ३२ । २४ । १८ । १२ । १३ । ८ यावत् पञ्च भविष्यन्ति । सर्वकार्यप्रसाधिका विद्यानाम प्रथमं प्रस्थानम् १ । बाहुबलिविद्या द्वितीयं प्रस्थानम् २ । सौभाग्यविद्योपविद्या तृतीयं प्रस्थानम् ३ । मन्त्र-

पीठं चतुर्थं प्रस्थानम् ४ । एषां प्रभुर्मन्त्रराजः ५ । एषां मीलने कोटथंशो मन्त्रः गौतमाद् वज्रस्वामिनं यावत् कोटथंश[:] प्रवर्त्तितः । अतः परं व्युच्छिन्न एव । तेन कोटथंश स्मरणार्थं कोटिकगणः कृतः । श्रीवज्रस्वामिशिष्यात् तिस्रः शाखाः संजाताः । अंशानयनोपायश्चायम्–मेरुरूपमन्त्रराजस्यांशाः षोडश ध्रुवाः १६ । पूर्वं विद्याविभागं दत्त्वा आसन्नलग्न अर्वाक्काले लग्नवेलायां एते शिष्यस्य दातव्याः । यतो यावत् तीर्थं तावदेते भविष्यन्ति शेषाः पूर्वोक्तस्तुत्यपदीं(दां)शा ग्राह्याः । अष्टौअष्टौ बाहु०। सौभाग्य०–उप०–मन्त्र० सर्वेषां समुच्चये अंशा जायन्ते। विषमांशो महाफलः । समंशो मध्यमफलः । अफलो न हि एकोऽपि ध्रुवम् ।

इति मन्त्रशुद्धिः समाप्ता ।

इदानीं नामसदृशं कोटचंशाख्यं तपः प्रोच्यते—

पूर्वं तपोविधानम् । तपसि क्रियमाणे आदेशो भवति । सिद्धिर्भविष्यति नवेत्येवं पश्चात् पूर्वोक्तनीतिद्वयेन साधना कार्या, तच्चेदं तपः। पूर्वं उपवासः । ततः पञ्च निवी । आचाम्लं १ पुनः ५ निवी । आं १ नि ५ आं १ नि १ चउत्थं १ एवं दिन २१ आद्यत्रियामाम् । अहर्निशं पठनं चिन्तनं विकथाविवर्जनं एकमनसाऽहोरात्रिकामनुष्ठानम्। प्रथमपरिपाटी १॥ उप १ नि १ आं ३ नि ४ आं १ नि २ उप १ पूर्वोक्तव्यापारोऽत्र विशेषेण कायोत्सर्गेण चत्वारिंशच्चतुर्विंशस्तवचिन्तनम्। अथवा सकलमन्त्रस्याष्टोत्तरशतचिन्तनम् । द्वितीया परिपाटी २ ॥ उप १ निवी ८ आं ५ निवी ७ आं १ निवी २ उप १ पूर्वव्यापारो ज्ञेयः। विद्यातृतीये तृतीयपरिपाटी ३ ॥ उप १ नि ५ आं १ उप १ अत्रापि पूर्वनीतिः चतुर्थपरिपाटी ४ ॥ मौनव्रतेन कर्पूरप्रचुरसुरभिद्रव्यपूजाञ्चितगौतमाराधनतत्परेण त्रिसन्ध्यं ध्यानं कार्यम् । स्त्रीमुखमपि नावलोक्यम्। अनया रीत्या षोडशाचाम्लानि नैरन्तर्यम्, पञ्चमपरिपाटी ५ ॥ यदि शक्तिस्तदाऽव्युच्छित्तिः । अथ ओली कृत्वा पार्यते ॥ छ ॥

तपोविधिः समाप्तः ॥

[अत्र स्तुतिपाठः पूर्वं २४-२५ पृष्ठे मुद्रितोऽस्ति
तथैव मूलप्रतौ लिखितस्तेनात्र न पुनर्मुद्रापितः]

इदानीं पदसंख्या भण्यते—

स्तुतिपद्यां द्वात्रिंशत्संख्यायां आद्यवाचनायां पद ७३, द्वादशपद्यां तृतीयवाचनायां पद ४९, [1]इमानि षट्सप्ततिपदानि[2] । स्तुतिपदद्वात्रिंशत् ३२, एएसिं इत्यादि द्वादश १२। एवं ४४ । पञ्चमन्त्रराजपदानि ५ पञ्चमन्त्रपीठपदानि ५। सप्तोपविद्यापदानि ७। पञ्चमहादेवतापदानि ५। दशबाहुबलिपदानि । सप्रणवभगवद्बाहुबलि२–प्रज्ञाश्रमण३-महाप्रज्ञाश्रमण४-

---

१ वक्ष्यमाणानि। २ क्रमेण भावयति।

वग्गु५-सुवग्गु६-निवग्गु७-सुम८-सोम९-महु१० इति ॥छ॥ इमानि त्रिसप्ततिपदानि । स्तुति-पदान्यष्टादश १८ । नमो सुहम्मसामिणो गणहरस्स महादाणस्स २ गोयमाईणं ३ एवं २१ । एएसिं इत्यादि पदद्वादश, एवं त्रयस्त्रिंशत् ३३ । दशमहाविज्जापदानि १० एवं ४३, सप्तमन्त्र-राज-मन्त्रपीठयोः । प्रत्येकम् ७ । नवोपविद्यायाम् ९, एवं २३ सप्तमहादेवाता[नाम्] ७,एवं त्रिंशत् ; सर्वमीलने ७३ । मन्त्रराजपदानि पञ्च षट् सप्त वा । पञ्च-सप्तपदानि प्रशस्यानि । न षट्,केषां वाचनायां कानि मन्त्रराजपदानि दशानां मध्याद् भवन्ति । गौतमभाषितानि किपि सिहिआ इमानि पञ्चैव । इगिपिफिवि । वृद्धश्रुतधराणां पदानामेष क्रमः संभाव्यते । वैसदृश्यं दृश्यते तन्न ज्ञायते २ । एकोनपञ्चाशत् [1]पूर्वोक्तानि । चतुर्विंशतिस्तुतिपदवाचनायां पदान्येकोत्तरशतानि चतुष्पीठोद्धरणे द्वात्रिंशत्पद्यां सार्ष्टं शतम् । वाच्यपदान्येव । विशेषश्चायम् अष्टादशपदद्वितीयवाचनायां सौभाग्यविद्यापद आद्यभागपद १६ अन्तभागपद ७ प्रस्थानपट-विधौ वलयाकारविभागेन ऊनानि अधिकानि भवन्ति ॥

मतान्तरेण पदसंख्या समाप्ता ॥ छ ॥

रेवती १–रोहिणी २–नागार्जुन ३–आर्यखपुट ४–यशोभद्राचार्य ५ इति नामानः सूरयः । एते मन्त्रसिद्धयः मिथ्या मे दुष्कृतं वाऽस्तु । शुद्धमशुद्धं कल्पयत । यतो भगवत्कालेऽप्येकादश गणधरा नवगणा हि अनेकधा जिनशासनम् । अनेकधा वाचना इति परिभाव्याऽस्य कल्पस्यान्ते स्वनाम न निगदितम् । किञ्चिन् तत्त्वं तत्त्वविदो जानन्ति । अङ्गविद्यामध्ये महाविशेषोऽस्ति, आलम्बनमात्रमेतत् क्षम्यतां क्षम्यतां सूरिवराः प्रवर्त्ततां जैनो धर्मः । अतिशयेन मन्त्र-स्येष्टांशं जानन्तु भूत-भविष्य-वर्त्तमानसूरयः प्रसन्ना भवन्तु सिद्ध्यन्तु ।

समाप्तोऽयं श्रीसूरिमन्त्रकल्पः । ग्रन्थाग्रम् २२० ॥

[मन्त्राम्नायः–]

ॐ नमो भगवओ रिसहजिणस्स आइगरस्स तित्थगरस्स जं सेयं चक्कं जलंतं गच्छइ । तेण चक्केण जं दुं(दु)ट्ठं जं च विसं जाला गद्दभा शाकिनी । चउरासीइ वायाओ बत्तीसं लूयाओ सत्तावीसं च अंधयगडाइं अट्ठावीसं च पुलयाओ जं चन्नं तं सव्वं ॐ हन हन दह दह पच पच मथ मथ छिन्द छिन्द भिन्द भिन्द सुदंसणेणं चक्केणं इंदस्स वज्जेणं हुं फट् स्वाहा । वार ७ अथवा २१ अथवा १०८ शतम् ॥ श्री ॥ छ ॥ श्रीः ॥

---

१ द्वादशपद्याम् ॥

मलधारिगच्छ–सूरिमन्त्रकल्पः॥

[दशवक्तव्यताधिकारमयः]

श्रीमलधारिगच्छसंप्रदायगतस्य श्रीसूरिमन्त्रस्य किञ्चिद्विचारो लिख्यते। तत्र च दश वक्तव्यताः। प्रथमं मुद्रादिवक्तव्यता १। ततः प्रथमपीठवक्तव्यता २। द्वितीयपीठवक्तव्यता ३। तृतीयपीठवक्तव्यता ४। चतुर्थपीठवक्तव्यता ५। पञ्चमपीठवक्तव्यता ६। पञ्चपीठमयसंपूर्णसूरिमन्त्रवक्तव्यता ७। सविस्तरदेवतावसरविधिवक्तव्यता ८। संक्षिप्तदेवतावसरविधिवक्तव्यता ९। मन्त्रमहिमवक्तव्यता १०, चेति।

तत्र प्रथमं मुद्रादिवक्तव्यता—मुद्राश्च शास्त्रान्तरेषु भूयस्यो दृश्यन्ते। परं सूरिमन्त्रोपयोगिन्यः सप्तदशमुद्राः प्रथमं शिक्षणीयाः। तद् यथा—उत्तानहस्तद्वयेन वेणीबन्धं विधायाङ्गुष्ठाभ्यां कनिष्ठिके तर्जनीभ्यां च मध्यमे संगृह्यानामिके समीकुर्यादिति परमेष्ठिमुद्रा १। आत्मनोऽभिमुखदक्षिणहस्तकनिष्ठिकया वामकनिष्ठिकां संगृह्याधः परावर्तितकराभ्यां गरुडमुद्रा २। वामहस्ततलेदक्षिणहस्तमूलं संनिवेश्य करशाखा विरलीकृत्य प्रसारयेदिति चक्रमुद्रा ३। परस्पराभिमुखौ ग्रथिताङ्गुलीकौ करौ कृत्वा तर्जनीभ्यामनामिकां गृहीत्वा मध्यमे प्रसार्य तन्मध्येऽङ्गुष्ठद्वयं निक्षिपेदिति सौभाग्यमुद्रा मध्यमसौभाग्यहेतुः ४। अत्रैवाङ्गुष्ठद्वयस्याधः कनिष्ठिकां तदाक्रान्ततृतीयपर्विकां न्यसेदिति सबीजसौभाग्यमुद्रा सौभाग्योत्कर्षहेतुः ५। दक्षिणाङ्गुष्ठेन तर्जनीं संयोज्य शेषाङ्गुलीप्रसारणेन वामहस्तं हृदि न्यसेदिति प्रवचनमुद्रा ६। उभयोः करयोरनामिका–मध्यमे परस्परानभिमुखे ऊर्ध्वीकृत्य मीलयेत्, शेषाङ्गुलीः पातयेदिति पर्वतमुद्रा ७। अन्योऽन्यग्रथिताङ्गुलीषु कनिष्ठिकाऽनामिकयोर्मध्यमा–तर्जन्योश्च संयोजनेन गोस्तनाकारा सुरभिमुद्रा ८॥ दक्षिणहस्तस्य तर्जनीं वामहस्तमध्यमया संदधीत, मध्यमां च तर्जन्या, अनामिकां कनिष्ठिकया, कनिष्ठिकां चानामिकया एतच्चाधोमुखं कुर्यादेषा धेनुमुद्रेत्यन्ये ९। उत्तानौ किञ्चिदाकुञ्चितकरशाखौ पाणी विधारयेदित्यञ्जलिमुद्रा १०। हस्ताभ्यामञ्जलिं कृत्वाऽनामिकामूलपर्वाङ्गुष्ठसंयोजनेनावाहनी ११। इयमेवाधोमुखा स्थापनी १२। संलग्नमुष्ट्युच्छ्रिताङ्गुष्ठौ करौ संनिधानी १३। तावेव गर्भगाङ्गुष्ठौ संनिरोधनी १४। मुष्टिं बद्ध्वा प्रसारिततर्जनिका–मध्यमोपरिनिवेशिताङ्गुष्ठाऽवगुण्ठनमुद्रा १५। दक्षिणकरेण मुष्टिं बद्ध्वा तर्जनी–मध्यमे प्रसारयेदित्यस्त्रमुद्रा १६। ग्राह्यस्य पुष्पादेरुपरि संहारेण हस्तं प्रसार्य कनिष्ठकादि-तर्जन्यन्तानामङ्गुलीनां क्रमसंकोचनेनाङ्गुष्ठमूलानयनाद् विसर्जनमुद्रा १७

एताः सप्तदशमुद्राः पुरस्तादुपयोक्ष्यन्ते। तत्र सर्वत्र लब्धिपदानि पीठानि च ज्ञानार्थे श्रीपूर्वाणि, वश्यार्थे ह्रींपूर्वाणि। शान्तिकादिकेषु कार्येषु प्रणवपूर्वाणि इति ज्ञेयम्। कर्मक्षयार्थे

लब्धिपदानि पीठानि च परमेष्ठिमुद्रया वा निर्मुद्रं वा प्रणव-ह्रीं-श्रींरहितानि केवलान्येव स्मरेदिति। तथा यत्र पीठे यौ जाप-होमौ उक्तौ तौ तेन तेन वक्ष्यमाणेन तपसा सह क्रियमाणौ तत्फलदौ, तपसि अकृते जाप-होमौ प्रायोऽल्पफलौ। तथा यदा जापं होमं वा आरभेत तदाऽन्तर्मनसं एवं वदेत्। संवत्–अमुकमास-तिथिवारे अहं अमुकसूरिशिष्योऽमुकसिद्धये अमुकं जापं होमं वा आरभे इति। तथा सूरिमन्त्रेऽन्तर्जल्पाकार–ओष्ठचालनवर्जितो जापः, कार्यो न ओष्ठचालनमय इति ॥

इति मुद्रादिवक्तव्यताऽधिकारः प्रथमः।

अथ प्रथमपीठवक्तव्यताऽधिकारः—

तत्र प्रथमपीठं विद्यापीठं नाम। तच्च लब्धिपदद्वादशकं 'पसिज्झउ स्वाहा' इत्यन्तं सप्तदशोत्तरशता[११७]क्षरनिष्पन्नम्। अस्याधिष्ठात्री सरस्वती, तस्याः पूजा–स्तुती कुर्यात्। आराधना तपोविधिस्त्वयम्—

उ नि आ नि आ नि आ नि उ इगपाणिगपणेगपणिगइगमेगं।
चिंतणपढणं विगहाचाओऽहोरत्तणुट्ठाणं ॥

अनेन तपसा महाफलम्, अन्यथा त्वल्पफलम्। पद्मासनस्थः पूर्वाभिमुख उत्तराभिमुखो वा परमेष्ठिमुद्रया गरुडमुद्रया वा सहस्रद्वादशकप्रमाणं जपेत्। श्वेतध्यानेन सामान्येन सर्वसिद्धिकरम्। तथा क्षीराश्रवादिलब्धिपदानि षट्सहस्रं श्वेतजपमालया श्वेतध्यानेन जप्यन्ते। षष्ठलब्धिपदान्ते तु 'जमियं सारस्सयं पउंजामि तं मे सारस्सयं पसिज्झउ स्वाहा' इत्यभिलापः। सिद्धसारस्वतमिदं प्रथमपीठेऽत्र १२ सहस्रजापानन्तरं होमः कार्यः

तद्विधिश्चायम्—हस्तमात्रं चतुरस्रं कुण्डं भौमं हसन्तीमयं वा कृत्वा अरणेर्वा रविकान्ताद् वा तत्राग्निं प्रज्वाल्य मन्त्रेण प्रतिष्ठापयेत्। स चायम्–'मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञं समिमं दधातु विश्वे देवाः स इह मा दयन्तामों प्रतिष्ठा' ॥ वारसप्तकं भणित्वा अक्षतक्षेपः कार्यो ज्वालामालाकरालेऽग्नौ अग्नेश्च सप्तजिह्वाः स्मरेत्। तत्र ईशानजिह्वायां मध्यजिह्वायां वा जुहुयात्। किं तत्? सप्तघृताहुतयो विद्यापीठेन। अथ दशांशेन द्वादशशतलक्षणेन गुटिकाभिर्होमाः। ताश्चेमाः–गरुडाख्यतण्डुलघृतैकवर्णगोदुग्धखण्डमय्यः। ताभिर्होमो विद्यापीठेनैव। पश्चात् केषाञ्चिदिष्टवस्तूनां कत्यपि होमास्त्रिभिः। पूर्णाहुतौ घृतभृतं नालिकेरम्। इदं च तदा वक्तव्यम्–'इमां पूर्णाहुतिं भगवति सरस्वति प्रतीच्छ मम कामितं कुरु स्वाहा ॥' यावन्नालिकेरं भस्मसाद् भवति तावत् प्रतीक्ष्यम्। वन्हिं च महाघृतप्लवेन दीपयेत्। 'घृतहीनं दहेद् राष्ट्रम्' इतिवचनात्। तद् भस्म संगृह्य स्वयं धारयेत्। इष्टेभ्यो वाऽल्पमल्पमर्पयेत्। शान्ति–तुष्टिकरम्।

इति होमविधिः ॥

अनयैव रीत्या विद्यायामुपविद्यायां होमः कार्यः । नवरं आहुति-होमो तत्र तेनैव मन्त्रेण देवतानाम च यथार्हमिति । एवं तपसा जपेन होमेनाराधिते प्रथमपीठे आचार्यः सरस्वती १, रोगापहारिणी २, विषापहारिणी ३, बन्धमोक्षणी ४, श्रीसंपादनी ५, परविद्याच्छेदनी ६, दोषनाशनी ७, अशिवोपशमनी ८—एता अष्टमहासिद्धीः स्वस्य परस्यापि साधयति । कोऽर्थः ? यदा स्वस्य परस्य वा सारस्वतमुत्पादयितुं रोगं हर्तुं विषं हन्तुं बन्धं मोक्षयितुं श्रियं कर्तुं कार्मणादि छेत्तुं दोषं नाशयितुं म(दुः)श्वगुपशमयितुं ईहते तदा प्रथमपीठं स्मरेत्, सिद्धिः स्वल्पयाऽपि स्मरणया । आभिरेवाष्टाभिर्विद्याभिः श्रीमानतुङ्गसूरिणा "यैः शान्तराग०" इत्यादि-"जलभारनम्रैः" इत्यन्तानि अष्टौ काव्यानि गर्भितानि दृश्यानि । तानि अष्टौ "ज्ञानं यथा त्वयि विभाति कृतावकाशम्" इत्यादिना नवमेन काव्येन सहितानि प्रातः प्रातर्यः पठेत् स सारस्वतादीः पूर्वोक्ता अष्टौ सिद्धीः प्राप्नोति, स्वं परं च प्रापयति । तथा द्वादशलब्धिपदानि एवं एवं स्मरेत् । प्रथमेन लब्धिपदेन सर्वतीर्थसलिलस्नानम् १, द्वितीयेन चान्दनमङ्गरागः २, तृतीयेन श्वेतानुपहतवस्त्राणि ३, चतुर्थेन मालेत्यादिधवलपुष्पमालाम् ४, पञ्चमेन सौवर्णं मुकुटम् ५, षष्ठेन सौवर्णं तिलकम् ६, सप्तमेन रत्नखचितं सुवर्णमयं कुण्डलं दक्षिणकर्णे ७, अष्टमेन तदेव वामकर्णे ८, नवमेन सौवर्णं ग्रीवाभरणम् ९, दशमेन रत्नखचितं सुवर्णमयमङ्गदं वामेतरबाहौ १०, एकादशेन रत्नखचितं सुवर्णमयमङ्गदं वामबाहौ ११, द्वादशेन जात्यमुक्ताफलमयं हारम् १२, इत्थं स्मरणेन प्रभुत्वधन-धान्यादिलाभः । तथा चोपदिशन्ति—

१स्नाना२ङ्गराग-३वसनो४ज्ज्वलपुष्पमाला
५कोटीर-६पुण्ड्रमथ ७-८कुण्डलयुग्मकं च ।
९ग्रैवेय१०-११मङ्गदयुगं १२वरहारमर्क-
संख्यैः पदैर्वपुषि भावय सूरिमन्त्रम् ॥ इति ।

इति प्रथमपीठवक्तव्यताधिकारो द्वितीयः ॥

द्वितीयं पीठं यथा—

प्रथमं तु यदुक्तं तद्विद्यापीठं नाम पीठमिति भेदः । अत्र 'समणस्स स्वाहा' इति यावद् बाहुबली विद्या अक्षर २०, । 'वग्गवादि सौमणसे महु महुरे स्वाहा' इति यावत् सौभाग्यविद्या अक्षर २४, उभयत्र अक्षर ४४ । अस्य द्वितीयपीठस्याधिष्ठात्री मानुषोत्तरशिखरनिवासिनी सहस्रभुजा त्रिभुवनस्वामिनी देवीति ।

आराधनातपोविधिस्त्वयम्—

उ नि आ नि आ नि उ इगेगतिचउदुगदुइगपुव्ववावारो ।
सविसेसो जिणथव४०चत्तमंतह्वसयं च उस्सग्गे ॥१॥

'जिणथवचत्त'त्ति लोगस्सुज्जोयगरे चत्वारिंशत् कायोत्सर्गे चिन्तनीया । 'मंतट्ठसयं च'इति अष्टोत्तरशतवारं सूरिमन्त्रं स्मरेत्, कायोत्सर्गे इति गाथार्थः ॥ एवं तपः कुर्वन् प्रथमं बाहुबली-विद्यां सहस्रद्वादशकं स्मरेत् श्वेतध्यानेन । होमः प्रथमपीठवदत्रापि । उत्पन्ने कार्ये ऐर्यापथिकीं प्रतिक्रम्य रजोहरणमुखवस्त्रिके पुरो मुक्त्वा कायोत्सर्गेण अष्टोत्तरशतवारं स्मरेत् । शुभे बाहू ऊर्ध्वमुत्तिष्ठतः । अशुभे त्वधः पश्चान्मुखं वलित्वा परस्परं मिलतः तथा अस्यां जप्यमानायां वादादौ अपराजितत्वम् , प्रत्यनीकोपशान्तिः । तथा अनया बाहुबल्या जप्यमानया शकुनो-पश्रुत्यादि सत्यमेव भवेत् ।

इति बाहुबलीविद्याविचारः ।

अथ द्वितीया वग्वादिसौभाग्यविद्या—

अत्र जापः सहस्राः षोडश सौभाग्यमुद्रया कनकपीतध्यानेन जपस्रगपि हैमी कृमि-जादिमयी वा । होमः स एव । एकत्रापि कृतेन होमेन विद्याद्वयसिद्धिः । अनया च मितम्पचोऽपि दाता राजकुले जनतायां दुष्टेषु सर्वत्र परमादेयतावचनता अनया च जया-विजया-जितत्वा-ऽपराजितत्वानि सिद्धयन्ति । तत्र जयः स्वदेशे, विजयः परदेशे, अजितत्वमरिषु, अपराजितत्वं परवादिषु इति सौभाग्यविद्या । आभ्यां द्वाभ्यां विद्याभ्यां निष्पन्नं एकमेव द्वितीयं पीठम् ।

इति द्वितीयपीठवक्तव्यताधिकारस्तृतीयः ॥ ३

अथ तृतीयपीठवक्तव्यताधिकारः प्रस्तूयते—

तृतीयं पीठं मन्त्रपीठं नाम । ॐ किरि इत्यादि स्वाहान्तं अक्षर ३१ । अस्याधिष्ठाता तु—

अणपणपन्निपइट्ठो, वीसभुओ मंतपीठहिट्ठाया ।
सोलससहस्सजक्खाण, सामिओ जयइ गणिपिडगो ॥१॥

तपोविधिरयम्—उ नि आ उ इगपणेगिगतइए पुव्वो विही समग्गो वि इति । अत्र जापः सितध्यानेन सहस्रा द्वादश । होमस्तु नास्ति । यत्र पुरुषोऽधिष्ठायकः स मन्त्रः, तत्र न होमः । यत्र स्त्री अधिष्ठात्री सा विद्या, तत्र होम इति वचनात् । किरीति कल्पेन्द्रदशकन्यासः फिरीति भवनपतीन्द्र-व्यन्तरेन्द्रन्यासः । सिरीति ज्योतिषेन्द्रन्यासः । हिरीति गणिपिटकः, अमल-स्वामिप्रमुखेन्द्रसामानिकन्यासः । महाकालीति सातिशयक्रियानिष्पादनलक्षणः कालो महांश्चासौ कालश्च महाकालः सोऽस्यास्तीति महाकाली जिनस्तन्न्यासः । सातिशयक्रिया च गणधरदेवा-भिषेकः । अप्रतिहतशासनत्वं संघश्रीसंपादकता—भक्तोपधिप्राप्तिर्दुष्टराजदैवोपसर्गस्खलनं दुर्भिक्षकान्तारोल्लङ्घनं शापानुग्रहसामर्थ्यं शिष्यव्यवस्था इत्यादीः सातिशयाः क्रियाः पूर्वोक्त-देवाः कुर्वन्ति । परलोकगतसाधु–श्रावकाणां च परलोकगतिं एते देवा मन्त्रपीठस्मर्तुः कथ-

यन्ति। यत् पूर्वपीठद्वयोक्तं कार्यं तदनेन जप्यमानेन निर्विकल्पं सिध्यति। विशेषतः सारस्वतम्। सारस्वते उपोष्य जापः प्राक्संख्यः। श्वेतध्यानेन महत्त्वादत्र्कमन्ते सिद्धिः ॥

इति तृतीयपीठवक्तव्यताधिकारस्तुर्यः ॥४

अथ चतुर्थमुपविद्यानाम पीठम्—

किरि इत्यादि स्वाहान्तं अक्षर २३। अस्याधिष्ठात्री—

पउमद्दहपउमनिलया सव्वंगाभरणभूसियंगिल्ला।
चउसट्ठिसुरिंदमणो मोहणगत्ता अपडिरूवा ॥१॥

विजया-जया-जयंती-नंदा-भद्दाहमन्निया सययं।
उवविज्जनिविट्ठा सिरिदेवी दिसउ मज्झ सिरिं ॥२॥

तपोविधिस्त्वयम्—'उ नि आ नि उ इगट्ठंसंसलंगनदुक्ष सुस्विसणं'। पूर्वविधिरत्र मेरुतस्तु-ज्जोयगरे ४० कायोत्सर्गे मन्त्रं वा अष्टोत्तरशतवारं कायोत्सर्गे स्मरेत्। अत्र जापः सहस्रा द्वादश १२००० श्वेतध्यानेन। होमविधिः प्रथम द्वितीयतृतीयपीठवदिहापि। चतुर्थे किंशुककुसुम-ध्यानेन पर्वतमुद्रया सहस्रा द्वादश १२०००। महाभूपानदि वश्यः तथा मंदिरयाद्यैर्निर्भयः, इष्टस्वप्नविषये जापः अष्टोत्तरसहस्रं १००८ उपोष्य श्वेतध्यानेन आदेशो भवति। षोडश-सहस्रजापे सारस्वतं अव्यभिचारि श्वेतध्यानेन। अस्य निरन्तरं जापात् दिव्यलब्धिः श्वेत-ध्यानेन, गुरूणां वा कांचन सिद्धिरस्ति सा तत्प्रासादेनसिद्धा भवति। शापानुग्रहसमर्थतादेव-गीस्ता तथा एतज्जापिताक्षतानां मस्तके गृहादिषु च शिरसि वालक्षेपोऽनेनैव कार्यः। विशेषतो योगोद्वहनारम्भे साधूनाम् ॥

इति चतुर्थपीठवक्तव्यताधिकारः पञ्चमः ॥५

पञ्चमं मन्त्रराजाख्यपीठम्—

ॐ किरीत्यादि स्वाहान्तं अक्षर २५। अस्याधिष्ठातारः कल्पेन्द्रा दश, भवनपतीन्द्रा विंशतिः, व्यन्तरेन्द्रा द्वात्रिंशत् ज्योतिष्केन्द्रौ द्वौ षोडशविद्यादेव्यः चतुर्विंशतियक्षाश्चतुर्विंशति-शासनदेव्यश्च। तपोविधिस्त्वयम्—

मोणेण सुरहिदव्वं वियणायमतप्परेण तिसंज्झं।
झाणं इत्थिअदंसणमंतपए सोलसायामा ॥१॥

आयामा इति आचाम्लानि। अयं मन्त्रराज[ः] पूर्वोक्तानां पीठानां स्वामी। मेरुशब्देन आर्हन्त्यम्। अस्य लक्षजापः। होमो नास्ति। एतल्लक्षजापात् प्रत्यक्षो गौतमः सूरिर्भवति।

शिष्यलब्धि[:] भवति उपासकानां धनकुटुम्बवृद्धिः। सिति(त)ध्यानेन मासं यावच्चक्रमुद्रया जपेत् प्रत्यनीकक्षयः। एतान्येव पञ्चविंशतिअक्षराणि कुङ्कुम–चन्दन–कस्तूरीभिः कांस्यपात्रे विलिख्य प्रतिदिनमष्टोत्तरशतं १०८ जापः पूजा च दिन २१ यावत्। क्षुद्रदैवतविहितरोगोपद्रवनिवृत्तिः। अथवा सर्वं फलम्।

इति पञ्चमपीठवक्तव्यताधिकार[:] षष्ठः ॥

इह च प्रथमपीठे मतिज्ञानम्, द्वितीये श्रुतज्ञानम्, तृतीयेऽवधिज्ञानम्, चतुर्थे मनःपर्यवज्ञानम्, पञ्चमे पीठे स्मर्यमाणे केवलज्ञानमुन्मीलतीति वृद्धाः ॥ छ ॥ ६ ।

अथ पञ्चपीठमयसंपूर्णसूरिमन्त्रवक्तव्यतासप्तमोऽधिकारः प्रस्तूयते—स चायं पञ्चपीठोऽप्ययं सूरिमन्त्रः परमेष्ठिमुद्रया श्वेतध्यानेन लक्षमानो जापः कार्यः–१००००० स्मरणीयः। सर्वोत्कृष्टा सिद्धिर्भवति। लीलयाऽप्युक्तं सत्यमेव भवति तथा यदा मरक-रोग-धाटीपौनःपुण्य(न्य)दोषादिकं उत्पन्नं नाशयितुमिष्यते, अभूतस्य चानुत्पत्तिरिष्यते तदा चान्दनेन रसेन कर्पूरेण स्थालं लिप्यते। छायाशुष्कं क्रियते। तत्र च द्वादशप्रतोलीप्राकारत्रयादिरूपं यथागमं समवसरणं जातीलेखिन्या उत्कीर्यते। तन्मध्ये च नाभेयमूर्त्तिश्चैत्यद्रुमादि यथागमश्रुतविस्तारयुग् लिख्यते। तदासनाधस्तात् सकुटुम्बोऽमुकोऽमुकग्रामेऽमुकस्त्रीत्यादि यथाकार्यं अक्षराणि चोत्कीर्यन्ते। तत्र स्थाले १०८ पुष्पैः सूरिमन्त्रं समग्रं जपेत्। अथ तत् स्थालं बृहत्कुण्डिकादौ त्रिगढीउपरि धृत्वा मन्त्रं भणद्भिरष्टोत्तरशतकलशैः स्नात्रं क्रियते समवसरणप्रतिमायाः। अथ तत् पुष्प–जल–चन्दनादि एकत्र गर्गर्यादौ कृत्वा मरकाद्याक्रान्ता नृ–तिर्यञ्चः पाय्यन्ते, आच्छोट्यन्ते, सर्वं सुस्थीस्यात्। तथा प्रातश्चतुर्दिशं ऊद्र्ध्वजुमन्त्रमेतं अञ्जलियोजनापूर्वं सकलं भणेत्, एकैकवारम्। प्रतिदिशं जनाकृष्टिः, तथा दीपोत्सवदिने उपोष्य आचाम्लं वा कृत्वा जापं प्रारभेत, शतपत्रीपुष्पैर्गरुडाक्षतैर्वा १०८ जापं कुर्यात् प्रत्यहं दिन २१ यावत्। किञ्चिदभिग्रहं कुर्यात्। वत्सरं यावत् ऋद्धिवृद्धिः स्यात्। स्वस्य श्रावकाणां च तानि पुष्पाणि अक्षतांश्च स्वान्तिके धारयेत्। इष्टाय दद्याद् महाश्रीभराय। एकविंशे दिने जापे पूर्णे पूर्वोक्तानां पञ्चपीठाधिष्ठायिकानां सरस्वती १, त्रिभुवनस्वामिनी १, गणिपिटक १, विजया १, जया १, जयन्ती १, नन्दा १, भद्रा १, लक्ष्मी १, इन्द्र ६४, विद्यादेवी १६, यक्ष २४, यक्षिणी २४ एवम् १३७। तथा गौतम १, क्षेत्रपाल १, गुरुपाद(दु)का १, एवम् १४०। मोदकनैवेद्यं कर्पूरादिपूजा। एवं वर्षं प्रति कृते ऋद्धिवृद्धिर्गच्छस्य। तथा सर्वत्र स्मरणायां आत्मानं मेरुचूलासिंहासनस्थाष्टदलाब्जकर्णिकास्थं प्रवचनमुद्रानिषण्णं छत्रचामरेन्द्रादिऋद्धिमन्तं गौतममेव चिन्तयेत्। ऐश्वर्यलाभः। तथाऽब्दवर्षाभावे गोमयगोमुखं कारयेत्। तदन्तश्चान्दनं प्राकारं कारयेत्, तदन्तर्गौतमं सिंहासनादिश्रीमन्तं चिन्तयेत्। मन्त्रस्मरणां कुर्यात् वार १०८। मन्त्राक्षराणि तत्र विवक्षितद्रङ्गादौ दुग्धममृतं क्षरन्ति। स्थानमिदं

प्राकारत्रयमयसमवसरणमध्यवर्तिनमस्तकुम्भं धवला तेजःपुञ्जेन अमृतेन वा परिप्लाव्यमानं । इति ध्यानं दध्यात् । मध्यपितुर्वर्ती केचिच्चदन्ति । तथा ॐ नमः सुपार्श्वाय पञ्चपरमेष्ठिमण्डले पद्मासनेनोपविष्टो आत्मानं निविष्टं संकल्प्य सूरिमन्त्रं स्मरतः परमेष्ठिध्यानः ।

इति पञ्चपीठकल्पसूरिमन्त्रजपनात्मकध्यानाधिकारः समाप्तः ॥ ७ ॥

अथ चिन्तामणिपतायमन्त्रविधिविधानकल्पाधिकारः प्रस्तावे—तद्यथा—तत्र मौक्तिकस्नात-स्नानः शुचिवस्त्रपरिधानोपविष्टो प्रतिष्ठाकल्पमानं परमेष्ठिमुद्रां कृत्वा पूर्वं देवतावसरप्रेरितोऽर्थी भूत्वा देवतावसरप्रारम्भेण ॥ तत्र विधिविधानाधिकाराः । तद्यथा—भूमिशुद्धिः १, अङ्गन्यासः २, सकलीकरणम् ३, हृदयशुद्धिः ४, स्नानम् ५, कल्मषदहनम् ६, पञ्चपरमेष्ठिस्थापनम् ७, देवतावसरपूजा ८, आवाहन ९—स्थापना १०—संनिधानं ११—संनिरोधः १२—अवगुण्ठनं १३—छोटिका १४—अमृतीकरणम् १५, जापः १६, क्षोभणम् १७, क्षामणम् १८, विसर्जनम् १९, स्तुतिः २०—इत्यधिकाराणां क्रमेणाह—

"ॐ भूरसि भूतधात्री सर्वभूतहिते भूमिशुद्धिं कुरु कुरु स्वाहा" इति मन्त्रेण भूतल[ं] त्रिर्वासक्षेपे भूमिशुद्धिः ॥ १ ॥

हृत्कण्ठतालु-भ्रू-मध्येब्रह्मरन्ध्रेषु यथाक्रमम् "ह्रां ह्रीं ह्रूं ह्रौं ह्रः" विन्यासेन त्रिः अङ्गन्यासः । वामकरं तत्र न्यस्येदित्याम्नायः ॥ २ ॥

क्षि पीतवर्णं जानुनोः, प श्वेतवर्णं नाभौ, ॐ रक्तवर्णं हृदये, स्वा नीलवर्णं मुखे, हा इति कृष्णवर्णं भाले—एतदेव हा स्वा ॐ प क्षि इति विपर्यासेन । एवं त्रिः सकलीकरणम् ॥३॥

"ॐ विमलाय विमलचित्ताय झ्वीं क्ष्वीं स्वाहा" इति मन्त्रं स्मरन् वामहस्तं हृदि न्यसेदिति हृदयशुद्धिः ॥ ४ ॥

"ॐ अमले विमले सर्वतीर्थजलैः पां पां वां वां अशुचिः शुचिर्भवामि स्वाहा" इति कराभ्यां योजिताभ्यां पञ्चाङ्गस्नानं त्रिः ॥ ५ ॥

इतरेतरं कराभ्यां भुजामध्यस्पर्शनपूर्वं "ॐ विद्युत्स्फुलिङ्गे महाविद्ये सर्वकल्मषं दह दह स्वाहा" अनेन कल्मषदहनं त्रिः ॥ ६ ॥

'ॐ ॐ नमः' इति मन्त्रेण संपुटदेवतालये वामश्रेयात् त्रिः तालत्रयं दद्यात् । छोटिकां दद्यात् । ततो सौभाग्यचक्रे पञ्चपरमेष्ठिस्थापना कुर्यात् । अतः परं सर्वमन्त्रेषूच्चारं भणिष्यति ॥७

सप्तगर्भैः पञ्चभिः पीठैः स्वाहास्थाने नमोऽन्तैः कर्पूरादिपूजा, पूजाकाले नमः, जापकाले स्वाहा इति वचनात् । इति देवतावसरपूजा ॥८

मध्यमणौ आर्हन्त्यपदे 'ॐ क्रौं ह्रीं श्रीं भगवन् गौतम ! सर्वलब्धिसंपन्न ! अत्र समव-सरणस्थसहस्रपत्रकमलके कलशे एह्येहि संवौषट्' इति मन्त्रेण आवाहनमुद्रया गौतमं हृत्-कुम्भकनाडीपथेनाकृष्य ब्रह्मरन्ध्रे नीत्वा ज्योतिर्मयं आह्वयेद् इत्यावाहनम् । इह च गौतमं

सप्तकरोच्चं स्वर्णवर्णं सिंहासन-चामर-छत्रामरपरिकरादिश्रीमन्तं प्रवचनमुद्रास्थं साक्षादागतमिव कल्पयेदिति गुर्वाम्नायः। उत्तरत्रापि यत्रावाहना तत्र हृत्पद्मादानयनं पूर्वोक्तपद्धत्यैव वाच्यम्। विवक्षितदैवतस्वरूपं च विचिन्त्यमिति ॥९

'आं क्रों ह्रीं श्रीं भगवन् गौतम! सर्वलब्धिसंपन्न! अत्र समवसरणस्थसहस्रपत्रकनककमले तिष्ठ तिष्ठ ठः ठः' इति मन्त्रेण स्थापनीमुद्रया स्थापना ॥१०

संनिधानीमुद्रया 'आं क्रों ह्रीं श्रीं भगवन् गौतम! सर्वलब्धिसपन्न! मम संनिहितो भव वषट्' इति संनिधानम् ॥११

संनिरोधनीमुद्रया 'आं क्रों ह्रीं श्रीं भगवन् गौतम! सर्वलब्धिसंपन्न! पूजान्तं यावदत्रैव स्थातव्यम्' इति संनिरोधः ॥१२

अवगुण्ठनमुद्रया 'आं क्रों ह्रीं श्रीं भगवन् गौतम! सर्वलब्धिसंपन्न! परेषामदीक्षितानामदृश्यो भव' इत्यवगुण्ठनम् ॥१३

विघ्नत्रासनार्थं ऋ ॠ ऌ ॡः वर्जै र्द्वादशभिः स्वरैः षट्सु दिक्षु प्रतिदिशं द्वाभ्यां द्वाभ्यां स्वराभ्यां छोटिका। अङ्गुष्ठात् तर्जनीमुत्थाप्य छोटिकां दद्यादित्याम्नायः ॥१४

अधोमुखधेनुमुद्रया अमृतं क्षरन्त्या गौतमं सजीवीकुर्यादित्यमृतीकरणम् ॥१५

'आं क्रों ह्रीं श्रीं भगवन् गौतम! सर्वलब्धिसंपन्न! गन्धादीन् गृह्ण गृह्ण नमः'। इति पूजाग्राहणम् ॥

अथ सर्वेषां सूरिमन्त्राधिष्ठायकानां आवाहनादीन् पूजाग्राहणपर्यन्तानष्टाधिकारान् कुर्यात्, तद्यथा—'आं क्रों ह्रीं श्रीं सर्वेऽपि सूरिमन्त्राधिष्ठायका अत्रागच्छन्तु संवौषट्' इति आवाहनीमुद्रया आवाहनम्, हृत्पद्मादानयेत् प्राग्वत् ॥१

'आं क्रों ह्रीं श्रीं सर्वेऽपि सूरिमन्त्राधिष्ठायका अत्र तिष्ठन्तु ठः ठः' इति स्थापनामुद्रया स्थापना ॥२

'आं क्रों ह्रीं श्रीं सर्वेऽपि सूरिमन्त्राधिष्ठायका मम संनिहिता भवन्तु वषट्' इति संनिधानीमुद्रया संनिधानम् ॥३

'आं क्रों ह्रीं श्रीं सर्वेऽपि सूरिमन्त्राधिष्ठायकाः पूजान्तं यावदत्रैव स्थातव्यम्' इति संनिरोधनीमुद्रया संनिरोधः ॥४

'आं क्रों ह्रीं श्रीं सर्वेऽपि सूरिमन्त्राधिष्ठायकाः परेषामदृश्या भवन्तु' इत्यवगुण्ठनमुद्रयाऽवगुण्ठनम् ॥५ छोटिका प्राग्वत् ॥६

अधोमुखधेनुमुद्रया अमृतं क्षरन्त्याधिष्ठायकानां सजीवतापादनममृतीकरणम् ॥७

ततोऽधिष्ठायकानां नामग्राहपूर्वकं पूजाग्राहणम् ॥८

तद्यथा—'आं क्रों ह्रीं श्रीं विद्यापीठप्रतिष्ठिता गौतमपदभक्ता देवी सरस्वती पूजां प्रतीच्छतु स्वाहा' इति मन्त्रं अञ्जलिमुद्रयोच्चार्य पूर्वमणौ विद्यापीठेन आदौ सप्रणवेन स्वाहास्थाने नमोऽन्तेन वासक्षेपः ॥१

'आं क्रों ह्रीं श्रीं विद्यापीठप्रतिष्ठिता मानुषोत्तरशिखरनिवासिनी सहस्रभुजा देवी त्रिभुवनस्वामिनी पूजां प्रतीच्छतु स्वाहा' इत्यञ्जलिमुद्रयोच्चार्य याम्यमणौ विद्यया ॐपूर्वया स्वाहास्थाने नमोऽन्तया वासक्षेपः ॥२

'आं क्रों ह्रीं श्रीं मन्त्रपीठप्रतिष्ठितः षोडशसहस्रयक्षस्वामी अतुलबलो त्रिंशतिभुजो गणिपिटकयक्षराजः पूजां प्रतीच्छतु स्वाहा' इत्यञ्जलिमुद्रयोच्चार्य पश्चिममणौ मन्त्रपीठेन ॐपूर्वेण स्वाहास्थाने नमोऽन्तेन वासक्षेपः ॥३

'आं क्रों ह्रीं श्रीं उपविद्याप्रतिष्ठिता पद्महृदनिवासिनी चतुःषष्टिसुरेन्द्रमनोमोहिनी सर्वाङ्गभूषणधरा जया-विजया-जयन्ती-नन्दा-भद्रासमन्विता श्रीदेवी पूजां प्रतीच्छतु स्वाहा' इत्यञ्जलिमुद्रयोच्चार्य उदग्मणौ उपविद्यया ॐपूर्वया स्वाहास्थाने नमोऽन्तया वासक्षेपः। अत्राम्नायः-श्रीदेवी स्वर्णाभरणभूषिता पुरःश्रेणीस्थनवनिधाना ध्यायते। स्वस्य परस्यापि श्रीर्भवति ॥ ४

'आं क्रों ह्रीं श्रीं मन्त्रराजप्रतिष्ठितो वज्रपाणिरैरावणवाहनः सौधर्मेन्द्रः शक्रः, शूलपाणिर्वृषभवाहनः ऐशानेन्द्र ईशानः, चक्रपाणिः सनत्कुमारेन्द्रः श्रमणः माहेन्द्राधिपतिर्महेन्द्रः, बहुशक्तो ब्रह्मलोकेन्द्रः सौमनसः, षष्ठ–सप्तमा–ऽष्टमकल्पेन्द्रा लान्तकमहाशुक्र–सहस्रारा:, आनत-प्राणताधिपतिः प्राणतेन्द्रः, आरणाऽच्युताधिपतिरच्युतेन्द्र इति दश वैमानिकेन्द्राः। असुरकुमारेन्द्रौ चमरबली, नागकुमारेन्द्रोऽष्टकुलनागराजः सहस्रफणो धरणेन्द्रो भूतानन्दश्च, विद्युत्कुमारेन्द्रौ हरिकान्त–हरिस्सहौ, सुपर्णकुमारेन्द्रौ वेणुदेव–वेणुदारिणौ, अग्निकुमारेन्द्रौ अग्निशिखा–ऽग्निमाणवकौ, वायुकुमारेन्द्रौ वेलम्बन-प्रभञ्जनौ, स्तनितकुमारेन्द्रौ सुघोष–महाघोषौ, उदधिकुमारेन्द्रौ जलप्रभौ, द्वीपकुमारेन्द्रौ पूर्णविशिष्टौ, दिक्कुमारेन्द्रौ अमितगति–अमितवाहनौ इति विंशतिर्भवनपतीन्द्राः। पिशाचेन्द्रौ काल–महाकालौ, भूतेन्द्रौ सुरूप–प्रतिरूपौ, यक्षेन्द्रौ पूर्णभद्र–माणिभद्रौ, राक्षसेन्द्रौ भीम–महाभीमौ, किन्नरेन्द्रौ किन्नर–किंपुरुषौ, किंपुरुषेन्द्रौ सत्पुरुष–महापुरुषौ, महोरगेन्द्रौ अतिकाय–महाकायौ, गन्धर्वेन्द्रौ गीतरति–गीतयशसौ। अप्रज्ञप्तेन्द्रौ संनिहित–समानौ, पञ्चप्रज्ञप्तेन्द्रौ, धातृ–विधातारौ, ऋषिवादितेन्द्रौ ऋषि-ऋषिपालकौ, भूतवादितेन्द्रौ ईश्वर-महेश्वरौ, क्रन्दितेन्द्रौ सुवत्स-विशालौ, महाक्रन्दितेन्द्रौ हास-हासरती, कूष्माण्डेन्द्रौ श्वेत-महाश्वेतौ, पवकेन्द्रौ पवक-पवकपती इति द्वात्रिंशद्व्यन्तरेन्द्राः। ज्योतिष्केन्द्रौ चन्द्र–सूर्यौ इति चतुःषष्टिसुरेन्द्राः। तथा रोहिणी प्रज्ञप्ती वज्रशृङ्खला वज्राङ्कुशा चक्रेश्वरी नरदत्ता काली महाकाली गौरी गान्धारी सर्वास्त्रा महाज्वाला मानवी वैरोट्याऽ-

च्छुप्ता मानसी महामानसी इति षोडश विद्यादेव्यः । तथा गोमुख-महायक्ष-त्रिमुख-ईश्वर-तुम्बुरु-कुसुम-मातङ्ग-विजयाजित-ब्रह्म-ईश्वर-कुमार-षण्मुख-पाताल-किन्नर-गरुड-गन्धर्व-यक्षेन्द्र-कुबेर-वरुण-भृकुटि-गोमेध-पार्श्व-मातङ्गा इति चतुर्विंशतिः शासनयक्षाः । तथा अप्रति-चक्रा-अजितबला-दुरितारि-काली-महाकाली-अच्युता-शान्ता-भृकुटि-सुतारा-ऽशोका- मानवी-प्रचण्डा-विदिता-ऽङ्कुशा-कन्दर्पा-निर्वाणी-बला-धारिणी-वैरोट्या-नरदत्ता-गान्धारी-कूष्माण्डी-पद्मावती-सिद्धाय(यि)काश्चेति चतुर्विंशतिशासनदेव्यश्च पूजां प्रतीच्छन्तु स्वाहा' इत्यञ्जलि-मुद्रयोच्चार्य मध्यमणौ ॐपूर्वेण स्वाहास्थाने नमोऽन्तेन मन्त्रराजेन वासक्षेपः । वासग्रहणेन सर्वत्र कर्पूरादिपरिग्रहः । अत्राम्नायः—इन्द्रादीन् चतुर्धा चतुर्धा कल्पयित्वा चतसृष्वपि दिक्षु स्थापयेद् गौतमं परितः । सर्वं संकल्पविलसितमेतत् इति पूजाग्राहणम् ।

अथ सौभाग्यमुद्रया परमेष्ठिमुद्रया प्रवचनमुद्रया सुरभिमुद्रया-ऽञ्जलिमुद्रया च प्रत्येकं पञ्चपीठमय-संपूर्णसूरिमन्त्रजापः । आम्नायोऽत्र सौभाग्यमुद्रायां सर्वाणि लब्धिपदानि पीठानि च ह्रींपूर्वाणि स्वाहान्तानि तु पीठानि १। परमेष्ठिमुद्रायां ॐपूर्वाणि स्वाहान्तानि पञ्चपीठानि २ । प्रवचनमुद्रायां श्रींपूर्वाणि स्वाहान्तानि पञ्चपीठानि ३ । सुरभिमुद्रायां अञ्जलिमुद्रायां च यथावस्थितं श्रीअभयदेवसूरिक्रमागतं एकोनत्रिंशदधिकशतद्वयमिताक्षरं गुरुणा दत्तं मन्त्रं जपेत् । ततो निखिलमन्त्रं मन्त्रराजं वाऽष्टोत्तरशतवारं जपेत् ।

इति पूजाग्राहणप्रक्रियापूर्वकः षोडशो जापाधिकारः १६ ॥

ततोऽस्त्रमुद्रया आसनं [1]मनाक् चालयेदिति क्षोभणम् ।

ॐ आज्ञाहीनं क्रियाहीनं मन्त्रहीनं च यत् कृतम् ।
तत् सर्वं कृपया देव ! क्षमस्व परमेश्वर ! ॥

इति क्षामणश्लोकपाठपूर्वं-'ॐ ह्रीं नमोऽस्तु भगवन् गौतम ! सर्वलब्धिसंपन्न ! पुनराग-मनाय स्वस्थानं गच्छ गच्छ' । यः विसर्जनमुद्रया विसृज्य ब्रह्मरन्ध्रद्वारेण हृत्पद्मं प्रत्यानयेत्, ब्रह्मरन्ध्रादन्तर्नाडीपथेन ततोऽस्त्रमुद्रया क्षोभणं कृत्वा

ॐ आज्ञाहीनं क्रियाहीनं मन्त्रहीनं च यत् कृतम् ।
तत् सर्वं कृपया देवाः ! क्षमध्वं परमेश्वराः ! ॥

इति पठित्वा 'ॐ ह्रीं सर्वेऽपि सूरिमन्त्राधिष्ठायकाः पुनरागमनाय स्वस्थानं गच्छन्तु यः' इति विसर्जनमुद्रया विसृज्य ब्रह्मरन्ध्रेणान्तर्नाड्या हृत्पद्मे तथैव दिग्भागस्थित्या चतुर्धा कल्पयित्वा प्रत्यानयेत् एतावता क्षोभण-क्षामण-विसर्जनानि सिद्धानि । 'सूरिमन्त्राधिष्ठायका-

---

१ कूचा ।

रावनार्थं करेमि काउ(स्सग्गं)' लोगस(स्स) ४ सागरवरगंभीरायावत् इति रुद्रपल्लीयाः। एवं अधिकार १९ ॥

जापसमाप्तौ अकृतेऽपि विसर्जने स्तुतिपाठः। विसर्जनात् पश्चाद् वा स्तुतिपाठः। स्तुतिश्चेयम्–"पढमपए सुपइट्ठा विज्जाए सूरिणो गुणनिहिस्स" इत्यतः 'किं चिंतामणि-कामधेणु' इत्यन्ता विंशतिगाथाप्रमिता श्रीमानदेवाचार्यनिर्मिता स्तुतिः श्रीसूरिमन्त्रकल्पादव-सेया। इति सूरिमन्त्राधिष्ठायकस्तवः। इति स्तुतिपाठद्वारं विंश इति।

इति विस्तरदेवतावसरविधिवक्तव्यता।

अथ संक्षिप्तदेवतावसरविधिवक्तव्यताऽधिकारः प्रस्तूयते, तद् यथा—

स्तोकजलकृतशौचः शुचिअव्यङ्गवसन ऐर्यापथिकीं प्रतिक्रम्य पूर्वाभिमुखः पद्मासनस्थः पुरो देवतावसरझोलिकां धृत्वा 'क्षिप ॐ स्वाहा' अक्षरैः सकलीकरणं कुर्यात् त्रिः। 'ॐ नमो अरिहंताणं उदरं रक्ष। ॐ नमो सिद्धाणं ललाटं रक्ष। ॐ नमो आयरियाणं शिखां रक्ष। ॐ नमो उवज्झायाणं कवचं रक्ष। ॐ नमो लोए सव्वसाहूणं शस्त्रं रक्ष' इति मन्त्रेण कराभ्यां तत्तदङ्गस्पर्शनेनात्मरक्षां कुर्यात्। 'ॐ नमो अरिहंताणं ॐ नमो सिद्धाणं ॐ नमो आयरियाणं ॐ नमो उवज्झायाणं ॐ नमो लोए सव्वसाहूणं। ॐ नमो आगासगामीणं। ॐ नमो चारण-लद्धीणं। ॐ हः क्षः नमः अशुचिः शुचिर्भवामि स्वाहा' इति मन्त्रस्नानं कृत्वा देवतासरं छोटयित्वा पञ्चपरमेष्ठिनो मण्डयेत्।

अथ प्रथमं वासैर्भूमिपूजां कृत्वा ॐपूर्वेण स्वाहास्थाने नमोऽन्तेन विद्यापीठेन सरस्वत्यधिष्ठिते पूर्वमणौ वासक्षेपः १। ॐपूर्वया स्वाहास्थाने नमोऽन्तया विद्यया वासक्षेपस्त्रिभुवनस्वामिन्यधिष्ठिते याम्यमणौ २। ॐपूर्वेण स्वाहा स्थाने नमोऽन्तेन मन्त्रपीठेन गणिपिटकयक्षराडधिष्ठिते पश्चिमसणौ वासक्षेपः ३। ॐपूर्वया स्वाहास्थाने नमोऽन्तयोपविद्यया श्रीदेव्यधिष्ठिते उदग्मणौ वासक्षेपः ४। ॐपूर्वेण स्वाहास्थाने नमोऽन्तेन मन्त्रराजेन इन्द्र ६४–विद्यादेवी १६–यक्ष २४–यक्षिणी २४– अधिष्ठिते मध्यमणौ आर्हन्त्यरूपे वासक्षेपः ५।

अथ सौभाग्यार्थं सौभाग्यमुद्रया, अधिष्ठायकानां सजीवतापादनार्थं सुरभिमुद्रया, कर्म-क्षयार्थं परमेष्ठिमुद्रया, क्षुद्रोपद्रवशान्त्यर्थं गरुडमुद्रया, शत्रुक्षयार्थं चक्रमुद्रया एकैकवारं सकलं मन्त्रं स्मरेत्। नवरं सौभाग्यमुद्रायां ह्रींपूर्वाणि पीठानि। शेषमुद्राचतुष्टये ॐपूर्वाणि पीठानीति विभेदः।

अथ सकलमन्त्रं वार १०८ अथवा वार ५४ अथवा वार ३६ यथासमाधिस्मरणां कुर्यात् मनःस्थैर्याय शिरसि हृदि नाभौ द्वादशकमलं ध्यात्वा पत्रे पत्रे मुष्ट्या एकैकं लब्धिपदं

चिन्तयेत् स्मरणां कुर्वन् अक्षरशुद्धिं अक्षरसंख्यां पीठानां आराधनाविधिं अधिष्ठातॄन् चिन्तयेत् गुरूपदेशं विस्मार्य शुकपाठं न कुर्यात्।

इति संक्षिप्तदेवतावसरवक्तव्यता नवमोऽधिकारः ९ ॥

अथ महिमवक्तव्यता प्रस्तूयते, तद्यथा—

एष सूरिमन्त्रः श्रीवीरेण गौतमाय एकविंशतिशताक्षरप्रमाणो दत्तः। तेन च द्वाविंशत्-श्लोकप्रमाणः कृतः। कालेन हीयमानो यावद् दुःप्रसहस्याष्टश्लोकप्रमाणो भावी न च पुस्तके लिख्यते आज्ञाभङ्गप्रसङ्गात्। यावन्मात्रश्च संप्रति वर्त्तते तावतः सर्वस्यापि लग्नवेलायां दाने इष्टलग्नांशस्तिष्ठति। अतो लग्नादर्वागपि पीठचतुष्कं दातव्यम्। इष्टलग्नांशे पुनश्चतुष्पीठ-प्रभोर्मन्त्रराजस्य पदानि देयानीति गुरवः प्राहुः। अस्य च प्रत्यक्षरविवरणं संप्रति कोऽपि न जानाति। गुरुमुखाल्लब्धाः कत्यप्याम्नायाः कल्पेऽस्मिन् लिखिता इति। अस्याराधकः सूरिः सूतकभक्तं मृतकभक्तं रजस्वलास्पृष्टभक्तं मद्यमांसाशिभक्तं न भुङ्क्ते। अन्येषां साधूनां उच्छि-ष्टाम्भः कणेनापि लग्नेन एतस्य भोजनं न कल्पते। तद्गच्छीयः सूरिस्तद्गच्छीयं सूरिं भुञ्जानं स्पृशतु। नास्ति दोषः। अन्यत्र दोषः ॥

इति महिमवक्तव्यताऽधिकारो दशमः १० ॥

श्री मलधारिगच्छसूरिमन्त्रकल्पः आपुष्पदन्तं जीयात् ॥

अक्षरशुद्धिसंख्यामयीं उपनिषदम्—

प्रथमलब्धिपदे अक्षर ५, द्वितीये अक्षर ७, तृतीये अक्षर ९, चतुर्थे ९, पञ्चमे ८, षष्ठे ११, सप्तमे ९, अष्टमे १०, नवमे ८, दशमे ८, एकादशे ७, द्वादशे ७।

"जमियं पउंजामि सा मे विज्जा पसिज्झउ स्वाहा" अक्षर १७ ॥ एवं प्रथमपीठे अक्षर ११५, द्वितीयपीठे अक्षर ३५ ॥ अथ किरि किरि कालि अक्षर ७, रि अक्षर ६, सि ६, हि ६, महा ६; एवं तृतीयपीठे अक्षर ३१ ॥ ॐ कि० ५, पि ४, सि ४, हि ४, इरिया ६; एवं चतुर्थपीठे अक्षर २३ ॥ ॐ कि० ५, पि ४, सि ४, हि ४, आयरिय ८ एवं पञ्चमपीठे अक्षर २५; एवंकारके अक्षर २२९। तथाहि ११५, ३५, ३१, २३, २५ एवंविधं शुद्धं मन्त्रं अधी-यानस्य स्मरतः सर्वसिद्धिः ॥

इत्युपनिषदं अक्षरशुद्धिसंख्यामयीं सूरिः स्मरेत्।

समाप्तोऽयं सूरिमन्त्रविचारः ॥ कृतिरियं श्रीमलधारिश्रीराजशेखरसूरीणाम् ॥

विभिन्नाम्नायकल्पादि ॥

सूरिमन्त्रमध्यगताम्नायः—

नित्यं कान्तं बलादित्याकारं भाले बालेन्दोर्लेखायुक्तं योगी ध्याये [द्] ह्रींकारम्, 'ॐ क्लीं ऐं ऐं श्रीं सौं क्लीं'पूर्वं श्रीगीदे(दें)वीदत्तं बालेन्दोः सूरेः षड्बीजम् । ॐः ग्राज्यं राज्यं प्रज्ञां पुष्टिं वै दद्यात् ॥ छ ॥

गोरोचना-मनःशिला-जात्यकुङ्कुमं तमालपत्राणि-एतानि चत्वार्यौषधानि सममात्राणि सुरूपया कुलीनया अचुम्बितया उत्तराभिमुखनिषण्णया कन्यया पुष्यार्के पेषयेत् । तच्चूर्णं पुष्यार्के उपोषितेन आचाम्लस्थेन वा भोजनादर्वाग् वा मन्त्रेणाऽष्टोत्तरशतवारं सूरिणाऽभिमन्त्रणीयम् । स चायं मन्त्रः—

'ॐ नमो जिणाणं, नमो पण्णसमणाणं, नमो वेसवणस्स, नमो रयणचूडाए, नमो पुण्णभद्दमाणिभद्दाणं, नमो सव्वाणुभूईणं, नमो ! रयणुत्तरपुप्फचूलाणं, नमो अट्ठण्हवाईणं सिद्धि-संति-पुट्ठि-सिद्धाणुमय-सिद्धाणुवयाणं आणाइक्कमणिज्ज स्वाहा' अक्षराणि मन्त्रे ९२। अभिमन्त्रितं तच्चूर्णं गुटिकाः कुर्यात् । ताभिर्गुटीभिः पर्युषितोऽह्ना चन्द्रकलया वा वाम-करानामिकया भालेऽधोमुखं तिलकं कुर्यात् । नर-नारी-राट्सर्वं स्ववशात् । यावत् सत्तिलकस्तावत् क्ष्वेडं न क्रमते ।

इति सूरिमन्त्रमध्यगताम्नायः ॥ श्री ॥

लब्धिफलप्रकाशककल्पः—

ॐ नमो अरिहंताणं नमो जिणाणं ह्रां ह्रीं ह्रूं ह्रौं ह्रः अप्रतिचक्रे फट् विचक्राय स्वाहा ॥ ॐ ह्रीं अर्हं अ सि आ उ सा ह्रीं ह्रीं स्वाहा ॥ एतत् सर्वं प्रयोजनीयम् । विशूचिकाशान्ति-र्भवति १ । ॐ नमो अरहंताणं नमो जिणाण ह्रीं । पु(पु)प्प १०८ जपेत् ज्वरनाशनम् २ । णमो परमोहिजिणाणं ह्रां शिरो[रो]गनाशनम् ३ । णमो सव्वोहिजिणाणं ह्रां अक्षिरोगनाशनम् ४ । णमो अणंतोहिजिणाणं कर्णरोगं नाशयति ५ । णमो कुट्ठबुद्धीणं शूल-गुल्म-उदररोगं नाशयति ६ । णमो बीजबुद्धीणं श्वास-हिक्कादि नाशयति ७ । णमो पदाणुसारीणं परैः सह विरोधं कलहं नाशयति ८ । णमो संभिन्नसोयाणं कासं नाशयति ९ । णमो पत्तेयबुद्धाणं प्रतिविद्याच्छेदनम् १० । नमो सयंबुद्धाणं कवित्वं पाण्डित्यं भवति ११ । णमो बोहिबुद्धाणं अन्यतरगृहीते श्रुते एकसंथो भवति, ५२ दिनं यावज्जपेत् १२ । नमो उज्जुमईणं शान्तिकं भवति, दिन २४ यावज्जपेत् १३ । णमो विउलमईणं बहुश्रुतत्वम्, लवणाम्लवर्जं भोजनम् १४ । णमो दसपुव्वीणं सर्वाङ्गवेदी भवति १५ । णमो चउदसपुव्वीणं जापः १०८ स्वसमय-पर-समयवेदी भवति १६ । णमो अट्ठंगनिमित्तकुसलाणं जीवित-मरणादिकं जानाति १७ । णमो

विउव्वणरिद्धिपत्ताणं काम्यवस्तूनि प्राप्नोति, दिन २८ जापः १८। णमो विज्जाहराणं उद्देश-प्रदेशमात्रं खे गच्छति १९। णमो चारणाणं चिन्तामुष्टिपदार्थस्वरूपं जानाति २०। णमो पु(प)ण्हसमणाणं आयुरवसानं जानाति २१। णमो आकासगामीणं अन्तरिक्षे योजनमात्रं गमयति २२। णमो दिट्ठिविसाणं स्थावर-जङ्गम-कृत्रिमविषं नाशयति २४। णमो उग्गतवाणं वाचा स्तम्भनम् २५। णमो दित्ततवाणं रविवाराद् दिनत्रिकं मध्याह्ने जापः सेनास्तम्भः २६। नमो तत्ततवाणं जलं परिजप्य पिबेद् अग्निस्तम्भः २७। णमो महातवाणं जलस्तम्भनम् २८। णमो घोरतवाणं विष-सर्प्पमुखरोगादिनाशः २९। णमो घोरगुणाणं लूतागर्भपिटिकादि नाशयति ३०। णमो घोरगुणाणं परक्कमाणं दुष्टमृगादीनां भयं नाशयति ३१। णमो घोरगुणब्रह्मचारीणं ब्रह्मराक्षसादि नाशयति ३२। [३३ लब्धिपदं तत्फलं च किमिति न निर्दिष्टम्] णमो आमोसहिपत्ताणं सर्वानपमृत्यूनपहरति ३४। णमो जल्लोसहिपत्ताणं अपस्मारमवलेपं चित्तविप्लवं नाशयति ३५। णमो विप्पोसहिपत्ताणं गजमारी शाम्यति ३६। णमो सव्वोसहिपत्ताणं मनुष्यमरकं नाशयति ३७। णमो मणबलीणं अश्वमारी शाम्यति ३८। णमो वचोबलीणं अजमारी शाम्यति ३९। णमो कायबलीणं गोमारी शाम्यति ४०। णमो अमयसवीणं समस्तमुपसर्गं शमयति ४१। णमो सप्पिसवीणं एकाह्निकद्वयाह्निक-त्र्याह्निक-चातुर्थिक-पाक्षिक-मासिक-सांवत्सरिकवातादिसमस्तज्वरं नाशयति ४२। णमो खीरसवीणं गोक्षीरं परिजप्य पिबेत् दिन २४ क्षयं कासं गण्डमालादिकं च नाशयति ४३। णमो अक्खीणमहाणसाणं आकर्षणम् ४४। णमा लोए सव्वसिद्धायदणाणं राजपुरुषादिवश्यम् ४५। ॐ नमो भगवदो महदि महावीरवड्ड(ड्ढ)माणवुद्धिरिसीणं चेतःसमाधिमवस्थायां प्राप्नोति ४६।

इति लब्धिपदफलप्रकाशकः कल्पः ॥ ठ ॥

'ॐ नमो सामण्णकेवलीणं' एतल्लब्धिपदफलम्

'ॐ नमो सामण्णकेवलीणं स्वाहा' एतल्लब्धिपदं रक्तध्यानेन पद्मासनेन विद्रुमाक्षमालया अष्टोत्तरसहस्रं जपेद् रजनौ। जापानन्तरं न केनापि समं वदेत्। लघुनिरोधमपि न कुर्यात्। यं कमपि संदिग्धं अर्थं मनसिकृत्य (सु)शुचिरभ्यङ्गवसनः श्रस्तरे शेते तस्यार्थस्य निश्चयं कश्चित् स्वप्ने आगत्य वदति। अथवा कश्चित् कञ्चिदर्थं याचितो न दत्ते, तमनुकूलयितुं इदं लब्धिपदं अष्टोत्तरसहस्रं शुचिर्मौनी रक्तध्यानेन पद्मासनेन विद्रुमाक्षमालया जपेत्, यियाचिषितपुरुषस्य तस्यां रजनौ स्वप्नो भवति। ततश्च इष्टलाभः। यत् किमपि चिन्त्यते तस्योपदेशः संपद्यत इति तत्त्वम् ॥ छ ॥

प्रणवमन्त्रस्मरणफलम्—

हरिन्मणिवर्णं प्रणवं भ्रूयुगान्तरे यः स्मरेत् अष्टोत्तरं शतं अष्टोत्तरसहस्रं वा अधिकं वा तस्य सद्योलाभ इति ॥ पूर्वाभिमुखोऽभ्यङ्गवसनो विद्रुमजपमालया रक्तध्यानेन निशीथे

यदेतत् संपूर्णं सूरिमन्त्रं १०८ वारं जपेत् तदाऽहोरात्रमध्ये विवक्षित ईश आकृष्ट इवायाति ॥छ॥

अञ्चलगच्छसूरिमन्त्राम्नायः—

ॐ ह्रीं नमो अरिहंताणं । ॐ ह्रीं नमो सिद्धाणं । ॐ ह्रीं नमो आयरियाणं । ॐ ह्रीं नमो उवज्झायाणं । ॐ ह्रीं नमो लोए सव्वसाहूणं । पदवर्ण ४५ । ॐ ह्रीं नमो भगवओ अर[हं]-तस्स महइ महावीरवद्धमाणसामिस्स । सिज्झउ मे भगवई महइ महाविज्जा ४२ । ॐ वीरे वीरे महावीरे जयवीरे सेणवीरे वद्धमाणवीरे जए विजये जयंते अपराजिए अणिहए ॐ ह्रीं स्वाहा ४४ ॥ एवं अक्षर १३१ इति वाचनाचार्यमन्त्रः । प्रवर्त्तिन्या अपि एष एव मन्त्रः ।

श्रीमदञ्चलगच्छाम्नायः ॥

नान्दीपद ५ सत्काक्षर ४५ युक्तमन्त्राक्षर ८६ संयोगे संख्या १३१ ॥ उक्तं च,

नन्दीपएसु पंचसु पणयालीसं हवंति किर वन्ना ।
मंतक्खरछासीई इगतीसहियं सयं सव्वे ॥१॥

प्रथमपीठलब्धिपदाक्षरसंख्या—

अर्हम् ॥ श्रीसूरिमन्त्रे श्रीचन्द्रवाचनायां सप्तमेरुयुक्तायां पञ्चपीठानि । तत्र प्रथमपीठे लब्धिपदानि षोडश । तत्र प्रथमे पदे अक्षर ५, द्वितीये ७, तृतीये ९, चतुर्थे ८, पञ्चमे ९, षष्ठे ११, सप्तमे ६, अष्टमे ९, नवमे १०, दशमे ९, एकादशे ७, द्वादशे १०, त्रयोदशे ७, चतुर्दशे ७, पञ्चदशे १५, षोडशे १४—एवं लब्धिपदेषु अक्षर १४३ । ततः 'एएसिं सव्वेसिं' इत्यादि 'पसिज्झउ' पर्यन्तं अक्षर २९ । एवं प्रथमपीठे अक्षर १७२ । अत्र कर्मक्षयार्थं लब्धिपदानि पीठानि च परमेष्ठिमुद्रया निर्मुद्रं वा प्रणव—ह्रीं—श्रीरहितानि केवलान्येव स्मरेदित्याम्नायात् । बीजाक्षररहिता लब्धिपदाक्षरसंख्या उक्ता ॥

इति प्रथमं विद्यापीठम् ॥

द्वितीयपीठे—'ॐ नमो भगवओ' इत्यादि 'विज्जा' यावत् अक्षर ३३—एषा बाहुबलीविद्या स्वप्नार्थम् । ततः 'वग्गु वग्गु' इत्यादि 'महुमहुरे' यावत् अक्षर २२—एषा सौभाग्यविद्या । ततो 'हिलि हिलि किलि किलि' इत्यष्टाक्षराणि अन्यत्रानुक्तान्यपि स्वगुरूक्तत्वाद् भणितानि । ततः 'इरि कालि' इत्यादि 'आयरिय कालि' यावत् अक्षर ३० । एवं द्वितीयपीठे अक्षरसर्वसंख्या ९३ ।

इति द्वितीयमहाविद्यापीठम् ॥

ततः तृतीये उपविद्यापीठे—'इरियाए' इत्यादि 'कालि महाकालि' यावत् अक्षर ३५ ॥

इति तृतीयं पीठम् ॥

चतुर्थं तु मन्त्रपीठम्—तत्र 'इरि इरि कालि' इत्यादि 'आयरिय आयरिय कालि' यावत् अक्षर ४६॥

इति चतुर्थं पीठम्

पञ्चमं मन्त्रराजपीठम्—तत्र 'इरि मेरु' इत्यादि अक्षर ३० स्वाहासहित ३२। एवं सकल-श्रीसूरिमन्त्रे अक्षर ३७८ श्लोक ११ अक्षर २६ ॥

इति श्रीअञ्चलगच्छे श्रीसूरिमन्त्राम्नायः चिरं नन्दतु ॥

अथ श्रीउपाध्यायमन्त्रः—ॐ नमो अरिहंताणं। ॐ नमो सिद्धाणं। ॐ नमो आयरियाणं। ॐ नमो उवज्झायाणं। ॐ नमो सव्वसाहूणं ३८। ॐ नमो ओहिजिणाणं ॐ नमो परमोहिजिणाणं ॐ नमो सव्वोहिजिणाणं। ॐ नमो अणंतोहिजिणाणं। ॐ नमो अरिहओ भगवओ महावीर-वद्धमाणसामिस्स सिज्झउ मे भगवई महइ महाविज्जा ७४। वीरे वीरे महावीरे जयवीरे सेणवीरे वद्धमाणवीरे जए विजए जयंते अपराजिए अणिहए। ॐ ह्रीं स्वाहा ४३ ॥

[एष] उपाध्यायमन्त्रः। श्रीमहत्तराणामप्येष मन्त्रः। सर्वाक्षर १५५।

अडतीसं परमिट्ठीपएसु, नंदीपएसु चउसत्त।
विज्जक्खर तिगचउरो, पणवन्नहियं सयं सव्वे ॥ १

अर्हं ॥ श्रीसूरिमन्त्रपटलेखनविधिः—

श्रीसूरिमन्त्रपटे सप्तवलयानि। तत्र प्रथमवलये चतुर्विंशतिकोष्टकाः। तेषु चतुर्विंशति-श्रीजिनेन्द्राः। द्वितीयवलये अष्टादशकोष्टकाः। तत्र कोष्टकषोडशके षोडशलब्धिपदानि। सप्त-दशकोष्टके 'सा मे विज्जा पसिज्झउ स्वाहा' ॥ विज्जाणं पीठं। एवमस्मिन् द्वितीयवलये अष्टा-दशकोष्टकेषु मुख्यमन्त्राक्षरसर्वसंख्या १९० 'विज्जाणं पीठं' इति पीठनाम। तथा तृतीयवलये एकादशकोष्टकाः। तेषु प्रथमे—ॐ श्रीइन्द्रभूतये नम। द्वितीये ॐ श्रीअग्निभूतये नमः। तृतीये ॐ श्रीवायुभूतये नमः। चतुर्थे ॐ श्रीव्यक्ताय नमः। पञ्चमे ॐ श्रीसुधर्माय नमः। षष्ठे ॐ श्रीमण्डितपुत्राय नमः। सप्तमे ॐ श्रीमौर्यपुत्राय नमः। अष्टमे ॐ श्रीअकम्पिताय नमः। नवमे ॐ श्रीअचलभ्रात्रे नमः। दशमे ॐ श्रीमेतार्याय नमः। एकादशे ॐ श्रीप्रभासाय नमः। तथा चतुर्थवलये 'ॐ नमो भगवओ बाहुबलिस्स पन्हसमणस्स' इत्यादि 'आयरिय कालि स्वाहा' ॥ महाविद्यापीठम् ॥ १

अस्य वलये मुख्यमन्त्राक्षर ९७। महाविद्यापीठम् इति तु पीठनाम २ ॥

तथा पञ्चमवलये 'ॐ इरियाए किरियाए' इत्यादि 'कालि महाकालि स्वाहा' उपविद्या-पीठम् ३ ॥

जापः १२००० जात्यादिभिः पुष्पैर्जप्तोऽयं सारस्वतः ॥ छ ॥ अस्मिन् वलये 'स्वाहा' यावद् मुख्यमन्त्राक्षर ३८ ज्ञेयाः। ततो यदुपविद्यापीठं तत् पीठनाम। ततो यज्जापादि तद्व-

लयपूरणाय, मन्त्राक्षरस्वरूपज्ञापनाय च ज्ञेयम् । तथा पञ्चवलये '3 इरि इरि कालि किरि किरि कालि' इत्यादि 'आयरिय आयरिय कालि स्वाहा' । मन्त्रपीठम् ४ ॥ छ ॥

अस्मिन् वलये मुख्यमन्त्राक्षर ४९ । मन्त्रपीठं इति नु पीठनाम ॥ तथा सप्तमवलये '3 इरि मेरु किरि मेरु' इत्यादि 'आयरिय मेरु स्वाहा' ॥ मन्त्रराजः ५ ॥

जापः १००००० ॥ अस्मिन् वलये मुख्यमन्त्राक्षर ३३ । ततो मन्त्रराज इति पीठनाम । ततो जापप्रमाणं वलयोद्गन्तिस्थानपूरणाय, जापप्रमाणज्ञानाय च । तथा मध्ये सिंहासनोपरिस्थ-कमलोपविष्टा श्रीगौतमस्वामिमूर्त्तिः । मूर्त्तरुपरि उभयतो गजेन्द्रावभिषेकं कुरुतः । मूर्त्ते-र्दक्षिणपार्श्वे '3 ह्रीं श्रीं' इति मन्त्रराजाक्षरत्रिकलिखनम् । वामपार्श्वेतु 'शिवशान्तितुष्टिपुष्टीः कुरु कुरु स्वाहा' इत्यक्षराणि लेख्यानि । तथा मूर्त्तेः परितः चतुर्दिक्षु चतुःषष्टीन्द्राणां षोडश विद्यादेवतानां चतुर्विंशतियक्षाणां चतुर्विंशतियक्षि(क्ष)णीनां च स्थापनाय चतुर्भागीकृता अङ्का न्यस्याः । यथा चतुर्दिक्षु षोडश–षोडशरूपोऽङ्को लिख्यते । सर्वमीलने चतुःषष्टिः । एवं सर्वत्र ।

एष सूरिमन्त्रपटलिखनविधिः ॥

सूरिमन्त्रपटालेखने अञ्चलगच्छाम्नायः—

तथा पटस्थपीठपञ्चकलिखित सकलमन्त्राक्षरसंख्या ४०७ माना विज्ञेया । तथा सत-मेरुयुक्तायां श्रीचन्द्रवाचनायां या सर्वाक्षरसंख्या अक्षर ३७६ प्रमाणा वर्त्तन्ते । तत्र प्रणवः, प्रतिपीठप्रान्तं स्वाहा चेत्यक्षराणि न गृहीतानि । तत्कारणं तत्र स्वयमेवोक्तमस्ति । अत्र च पटे यथार्हस्थाने प्रणवग्रहणात् प्रतिपीठप्रान्तं स्वाहाक्षरग्रहणाच्च अक्षरवृद्धिर्विज्ञेया । यदा तु अयं श्रीसूरिमन्त्रः पटे लेख्यते तदा अक्षर ४०७ मानो लेख्यः । यदा च श्रीचन्द्रवाचनायां तदा अक्षर ३७६ मानोऽयं ज्ञेयः, इति तत्त्वम् ।

इति श्रीमदञ्चलगच्छे श्रीसूरिमन्त्रपटलेखनाम्नायश्चिरं नन्दतात् । श्रीर्भवतात् ॥

श्रीमदञ्चलगच्छस्यायमाम्नायः ॥

वाचनाचार्यमन्त्रश्चायम्—"3 ह्रीं नमो अरिहंताणं ५ ॥ 3 नमो अरिहंताणं । नमो सिद्धाणं । नमो अणंतजिणाणं । नमो सिद्धजोगधराणं । नमो सव्वेसिं विज्जाहरपत्ताणं । कयंजली इमं विज्जारायं पउंजामि । इमा मे विज्जा पसिज्झउ आरकालि वालकालि पंसु-सुखरेओ आव तवो चंडि स्वाहा" । सत्तकक्कराओ भूमीओ धित्तूण क्रियाणकोपरि क्षिप्यन्ते । लहुविक्काइ तुलसीपत्ताइं सत्ताभिमंतिऊण कन्ने कीरंति जं मग्गइ तं लहइ । सत्ताभिमंतिओ कुमारी सुत्तदोरओ हत्थे बंधिउं कुचियं पसीयइ । घरकक्कराओ सत्त घित्तूण सत्त वारा जावियाहिं गावीसु णही वा आइन्मइ बहु गम्मइ जिल्लं जविऊण जरिज्झमक्खिज्जइ सज्जो हवइ । सप्पदट्ठस्स पाणीयं सत्ताभिमंतियं पाइज्जइ वि संजाइ । चूर्णिः ॥

"ॐ नमो भगवओ गोयमस्स गणहारिस्स अक्खीणमहाणसस्स सव्वाणं वत्थाणं सव्वाणं पत्ताणं सव्वाणं वत्थूणं ॐ अक्खीणमहाणसिया लद्धी हवउ मे मे स्वाहा"। उपयोगवेलायां सर्वं वा देयं वस्त्वभिमन्त्र्य देयम् ॥

मायाबीजकल्पः–

ॐ सिद्धिः ॥ मायाबीजाराधनविधिः षट्कर्मसु लिख्यते। तत्र त्रिधा शुद्धिः ब्रह्मव्रतः। एकाशनविहितस्नानो विभूषिताङ्गः शुचिवसनः प्राङ्मुखः उत्तराभिमुखो वा स्थिरासने समुपवेश्य 'ॐ भूरिसीभूतधात्री सर्वभूतहिते' भूमिशुद्धिः। 'ॐ अमले विमले०' अनेन मन्त्रेण सर्वाङ्गस्पर्शनेन स्नात्रम्। 'ॐ विद्युत्फुलिंगे महा०' अनेन मन्त्रेण भुजमध्यस्पर्शनेन कल्मपं (ष) दहनम्।

'ॐ अमलाय०' हृदयस्पर्शेन हृच्छुद्धिः। 'क्षिप ॐ स्वाहा। हा स्वा ॐ प क्षि' पञ्चाङ्गस्पर्शनेनाङ्गरक्षा। 'ॐ कुरु कुल्ले स्वाहा। हा स्वा ल्ले कु रु कु ॐ' सप्तस्थानस्पर्शनेन सकलीकरणम्। तंविधि (धिं) समाप्य विद्वेषणचालनेषु 'हुं वोषडंतं फट्' इति प्रयोज्यम्, वश्ये 'वषट्'। वैरिवधे तथाऽद्ये 'स्वाहा'। 'सु(स्व)धा' शान्ति-पौष्टिकेषु।

स्फु(स्फ)टिकप्रवाल-मुक्ता-चामीकर-पत्रजीवकृतमणिभिः।
अष्टोत्तरशतं जाप्यं शान्त्याद्यर्थं करोति बुधः ॥१॥
मोक्षाभिचारशान्तिवश्याकर्षेषु योजयेत् क्रमशः।
अङ्गुष्टाद्यङ्गुलिकामण(णं) योऽङ्गुष्ठेन चाल्यन्ते(ते) ॥२॥
पूर्वान्हे(ह्णे) वश्यकर्माणि मध्याह्ने प्रीतिनाशनम्।
उच्चाटनं चापराह्णेऽपि सन्ध्यायां मारणं ध्रुवम् ॥३॥
शान्तिकर्माण्यर्धरात्र(त्रे) तु प्रभाते पौष्टिकं तथा।
वश्यमुक्तानि कर्माणि सव्यहस्तेन योजयेत् ॥४॥
१उदयार्क-२रक्त-३शशधर-४धूम-५हरिद्रा-ऽसिता वर्णाः।
आकृष्टि-वश्यता-शान्तिक-विद्वेषणारावसमयेषु ॥५

एवं सर्वस्थितिं दत्त्वा चतुष्किकापदं वा सम्यक् प्रक्षाल्य रहसि आमघटोत्कीर्णं वा ताम्रपत्रोत्कीर्णं कुङ्कुमस्वस्तिकोपरिगतं मायाबीजं संस्थाप्य प्रथमकोणे 'गूङ्गणाधिपतये नमः' इत्यक्षरन्यासपूर्वं गणपतिं पूजयेत्। द्वितीयकोणे 'ब्रूंबुटकनाथाय नमः' इति बुटकनाथपूजा। रतीयकोणे 'न्दुं दुर्गायै नमः' इति दुर्गापूजा इति चतुर्थकोणे 'क्षैं क्षेत्रपालाय नमः' इति क्षेत्रपालपूजा ॥

एवं सर्वाधिष्ठायकान् संपूज्य विहितदीपोद्बोधः। मायाबीजोपरि नारजीगुजं धृत्वा

दीपशिखायां न्यस्तदृष्टिः जापं विदध्यात् । अन्तरान्तरा द्राक्षारसेन तर्पणां विधेयाम् । पट्ट-स्योपरि एवं प्रतिदिनं जापक्रमेण लक्षं यावत् परिपूर्य पूजासमाप्तौ दशांशेन होमः कार्यः ।

तस्यायं विधिः—वृत्तं कुण्डं मृन्मयं कृत्वा मध्ये षट्कोणयन्त्रसहितं वा ताम्रपत्रं स्थाप्य तु(त)न्दुल-शर्करा-दुग्धेन बदिरप्रमाणां गुटिकां कृत्वा होमयेत् । खदिरसमिधयो नवाङ्गुल विधेयाः । इत्येवं होमविधिः ॥

बन्दिमोक्षे शुक्लध्यानेन बुद्धिः (बद्धो) । परि अमृतवर्षं चिन्तयेत् । ॐ ह्रीं वषट् रक्त-ध्यानेन चिन्तयेत् । जगद्वशीकरणं(ण)सिद्धिः । ॐ ह्रीं त्रिपद्वेषणे धूम्रध्यानेन ॐ ह्रीं फट् उच्चा-टने कृष्णध्यानेन, ॐ ह्रीं संवौषट् आकर्षणं सन्ध्यारुणम् । ॐ ह्रीं स्वाहा शांतिके चन्द्रज्योत्स्ना। ॐ ह्रीं स्वधा पौष्टिके वल(उज्)ज्वलध्यानम् । ॐ ह्रीं घे घे मारणे कृष्णध्यान[म्] आरीठा-जपमाली ॥ श्रीर्भवतु ॥

१. ह्रींकारकल्पः।

ह्रींकारस्य किं तत्त्वं वद कौतूहलं मम ।
अधुना श्रोतुमिच्छामि मायाबीजस्य निर्णयम् ॥१
महाप्रश्नं त्वया पृष्टं देवानामपि दुर्लभम् ।
ब्रह्मेन्द्र-विष्णु-दैत्यानामपि गुह्यं हि सुन्दरि ! ॥२
न कस्यापि मयाऽऽख्या(ख्या)तं विना विष्णुं तु शोभने ! ।
यकाराद्दष्टमं बीजं बिन्दुभूषितमस्तकम् ॥३
चतुर्थस्वरसंयुक्तं रेफेणापि समन्वितम् ।
एनं देवि ! महामन्त्रराजानं परिकीर्तितम् ॥४
सहस्रदशजापेन भूताः सिद्ध्यन्ति नान्यथा ।
प्रेता विंशतिना चैव वेतालाः त्रिंशता तथा ॥५
चत्वारिंशता पिशाचाः पञ्चाशद् यक्ष-राक्षसाः ।
षष्ट्या सहस्रैर्गन्धर्वाः सप्तत्या किन्नराः स्फुटम् ॥६
अशीत्या हि सहस्रैश्च काव्यशक्तिः प्रजायते ।
नवत्या च सुराः सर्वे सिद्ध्यन्त्यत्र न संशयः ॥७
लक्षजापेन हे देवि ! इष्टसिद्धिः प्रजायते ।
अतः परं वरो नास्ति मन्त्रविद्या वरानने ! ॥८
एषा च परमा शक्तिर्मूलं च मयकोच्यते ।
विष्णुनाऽप्यमुना लोको मायावीर्येण मोहितः ॥९
अस्य ध्यानतो नो किञ्चिद् यो जपेन्नित्यमेव हि
एकाग्रचित्तो नासाग्रन्यस्तदृष्टिः समाहितः ॥१०
स्थावरं जङ्गमं चैव यदुग्रं कथितं विषम् ।
ज्वालागर्दभविस्फोटा वात-शीतलिकादयः ॥११

ज्वराश्च विविधा घोराः संनिपातास्त्रयोदश ।
वध-बन्धादयश्चान्ये सिंह-व्याघ्राश्च तस्कराः ॥१२
एते सर्वेऽपि शाम्यन्ति तमांस्यर्कोदये तथा ।
एतद् ध्यानं प्रवक्ष्यामि शृण(णु) देवेन्द्रवल्लभे ! ॥१३
स्फटिकामलसंकाशं हिमपुञ्जेन संनिभम् ।
प्रणाशयेद् विषं क्षिप्रमोक्षश्चैव प्रजायते ॥१४
रक्तवर्णं च यो ध्यायेद् योनिमध्ये वरानने ! ।
आकर्षत्युर्वशीरम्भामुख्या देव्यः किमु स्त्रियः ? ॥१५
अन्तःपुरनिवासा च राजपत्नी च या भवेत् ।
आनयेत न संदेहो वस्त्रालङ्कारभूषिताम् ॥१६
पीतवर्णं च यो ध्यायेत् कण्ठस्थं हृदि सुन्दरि ! ।
स्तम्भं क्षोभं विवादं वा विशेषं कुरुतेऽस्रकौ ॥१७
काकपक्षेण संकाशं शत्रूणां हृदये धृतम् ।
उच्चाटयेन्न संदेहो यदि शक्रसमो रिपुः ॥१८
नाभिप्रदेशे यो ध्यायेत् कृष्णरूपं वरानने ।
नरं तं मारयेन्नूनं यमतुल्यं यदा भवेत ॥१९
एतन्मर्म महागुह्यं प्रिये ! तुभ्यं वदाम्यहम् ।
कुदीक्षिते न दातव्यं दातव्यं च सुदीक्षिते ॥२०
दर्शनं दूषितं यस्य भुजके पापबुद्धिके ।
परद्रव्यरते हिंसा-परदोषपरायणे ॥२१
न दातव्यं च दातव्यं ब्रह्मचर्यदयारते ।
सर्वसिद्धिकरं ह्येतद् भुक्ति-मुक्तिप्रदायकम् ॥२२
[इति] ह्रींकारकल्पः [समाप्तः] ॥

[ह्रींकारविधिः]—

ॐ ह्रीं नमः ॥ एषा ह्रींनामलेखा विद्या । अस्या उपचारोऽयम् । कृष्णाष्टम्यां कृष्णचतुर्दश्यां वोपवासं कृत्वा श्रीपार्श्वनाथस्य मही(ह)तीं पूजां कृत्वा देवस्य दक्षिणबाहौ पद्मासनोपविष्टो द्वादशसहस्राणि जातिपुष्पैर्जपेत् । ततः सिध्यति । पश्चात् त्रिसन्ध्यं १०८ यो जपति सप्तभि-

दिनैर्ग्रन्थशतत्रयं गृह्णाति तथा जलं सप्ताभिमन्त्रितं काकेष्वलपत्सु षण्मासान् पिबति कविर्भवति सर्वशास्त्रवेत्ता च। संततजापेन सर्वजनप्रियः। मुद्रामञ्जलिं बद्ध्वा जपेच्चौरा बद्धाः स्युः। राजकुलं प्रविशन(ने) जपति राजप्रियः। अजारक्तेन यन्नाम लिखित्वा मानुषकपालं शलाकया विद्धं तापयेत् स वश्यः स्यात्। अलक्तेनाङ्गुष्ठं लिप्त्वा खड्गादर्शयोर्वा त्रिशूलहस्तां देवतामवतीर्णां पश्यति वाग्देवीं वाऽन्येषामपि दारक-दारिकाणं(णां) चतुःसप्ताभिमन्त्रितं कृत्वा खड्गादर्शे दर्शयेत् सर्वेऽपि पश्यन्ति। सर्वकर्म्मकरी विद्या॥

नालिकेरकल्पः ॥

"ॐ ह्रीं श्रीं क्लीं क्लीं एकाक्षाय भगवते भूरूपाय सर्वयुगेश्वराय त्रैलोक्यनाथाय सर्वकामप्रदाय नमः" ।

स द्विजटैकनेत्रस्य नालिकेरो महीतले ।
चिन्तामणिसमप्रोक्तः सर्ववाञ्छितदानतः ॥१॥

यश्चैत्राष्टम्यां रक्तपुष्पैः शत१०८लक्ष्मीबीजेन जापः । पुनः पुनः स्मरेत् । गृहे पूजयति तस्य सर्वाभीष्टार्थसिद्धिः । तस्य नालिकेरस्य प्रक्षालनजलेन पीतेन वि(व)न्ध्या पुत्रं लभते । 'ॐ ह्रीं नमः' अनेन मन्त्रेण प्रथमं नालिकेरं पूजयित्वा सर्वकुसुमैः सर्वसुगन्धैश्च पश्चाद् द्वादशसहस्राणि तन्दुलानि जपित्वा एकवर्णा गौः गोदुग्धेन परमान्नं कृत्वा रतिस्नानादनन्तरं भोजनं कार्यम् । उपोषितं कृत्वा एतत् कार्यम् । एकमेवं भव्यतरं लागु(ङ्ग)लीफलं ढोकयेत् तस्यादीयते भग्नं कृत्वा अपुत्राया वि(व)न्ध्या[याः] पुत्रो भवति । परं रतिदिनत्रयेभ्यः स्नानानन्तरम्, अस्य गन्धेन आघ्रातेन गूढगर्भा प्रसूते । एतस्य पूजनाद् लक्ष्मी स्थिरा जायते। एतस्य दीपालिकाया(यां) प्रपूजनात् तस्य ग्रामे विवादे जितः(जयः) स्यात् । एतस्य हट्टस्थापने व्यवसायलाभो वृद्धिः । एतस्य मायाबीजजापः । सर्वदी(दै)व दीपोत्सवे स्वे(श्वे)तपुष्पैः जापः । पूजनात् पूजकगृहे सर्वोपद्रवाः प्रणि(ण)श्यन्ति । एतस्य पूजितस्य दर्शनात् शाकिनीभूत-पिशाचादिदोषास्तत्कालं नश्यन्ति । एतस्य पूजनात् गृहे केचन दुष्टमुद्गलास्तेऽपि शान्तिकरा भवन्ति । किं बहुधाऽस्यैकनेत्रो द्विजटी सपक्वः स नालिकेरः कृतिनोऽस्ति गृहे चिन्तामणिः प्रोक्तः फलप्रभावात् सामान्यतां(तः) धन्योत्तमः स्वोचित इति । एकनेत्रसारप्रयोगाद् ।

रि(ऋ)द्धिर्विधाता प्रसवस्य हेतुः जटी । दुर्ज्जयरोगजेतादिकार्यः । कलिकल्पवृक्षो युगान्तरे किं धनमन्द(द)वीर्यः । सर्वधनधान्यराजमान्यता गृहे लक्ष्मीः भवति । उपसर्गा न भवन्ति । सर्वदुःखस्योत्तारो भवति ।

नालिकेरकल्पः समाप्तः ॥ श्रीः ॥

श्रीगुणसमुद्रसूरिसद्गुरुभ्यो नमः ॥

श्रीजिनप्रभसूरिविरचितं

वर्धमानविद्यास्तवनम् ॥

॥ अर्हं ॥

आसि किलट्ठुत्तरसयपयविन्नासो हुइज्ज पीढंमि ।
तत्तो उद्धरियाओ वायगसिरिचंदसेणेणं ॥ १ ॥
चउवीसाइजिणाणं विज्ञा एतासु जा चरमविज्ञा ।
सा वद्धमाणविज्ञा भन्नइ तस्सा थुवं काउं ॥ २ ॥
पणपरमिट्ठिपयाइं चत्तारि य थुयपयाइ धित्तूणं ।
उवज्झायकररन्ना जा विहिया....अवयरेहिं ॥ ३ ॥
जा विविहमंडलुद्धारवाइणा साहुणा फलविसेसा ।
दिप्पंति संपयाओ जे से जिणपवयणे चहवे ॥ ४ ॥
कल्लाणएसु पंचेसु वीरसामिणो कयविसेसतवविहिणो ।
आराहयंति रिसिणो हत्थुतराइनखत्तेसु ॥ ५ ॥
उववासमयणतेरासिदिणंमि अडहियसहस्सजावेणं ।
बारससहस्सजावे सिज्झइ जो वीरकल्लाणे ॥ ६ ॥
गरुडक्खएहिं सइवत्तणहं अडसयमीएहि पत्तेहिं ।
जविऊण ते सत्तादिणे पडोवरिं वीरबिंबे वा ॥ ७ ॥
तदुभयचुन्नविम(मि)स्सियवासक्खेवे कयंमि खीरदुमे ।
जा सिज्झइ ता वासा सिरिखित्ता निरुवसग्गकरा ॥ ८ ॥
जं सिरिऊण सिरं निवपूइयसे(सो)हग्गमाइया तासिं ।
दीहाइसाइणिसमं सुगइं च भवंतरे लहइ ॥ ९ ॥
अणुओगगणाणट्ठा वयजोगपइट्ठअत्थसत्थेसु ।
जीए वासक्खेवो गुरुहिं किरइ अविग्घट्टं ॥ १० ॥

अक्खयवासजलेहिं जीए आरिसंभयं हरइ दोसं ।
भवियाण कुणइ ऋद्धिं आरोग्गं तह य वसकरणं ॥ ११ ॥
जा वद्धमाणविज्ञा निरवि(व)ज्ञा भगवओ य सिज्झाओ ।
मे कम्मखयस्स परमो हेउ इहलोइयफलाय ॥ १२ ॥
अक्खीण-बीय-कुट्टे य विवाय-नृजय-समिणिआ एसा ।
संपावइ भत्ताणं विहिणा जविया इमा विज्ञा ॥ १३ ॥
एयाइं विज्ञाइं पभावओएण जस्स करि भव्वो ।
अणिगइ कल्लाणसुहं नित्थारपारगा होउ ॥ १४ ॥
पणवं हरियं तत्तं रत्तं कणयप्पहे य वियपएसे ।
तं सुक्कज्झाणेणं झायइ जो तस्स वरऋद्धी ॥ १५ ॥
जविऊण इमं विज्जं वारे इगवीस सम्ममवियन्नो ।
जो खलु पविसइ गामं कज्जं से सोहणं होइ ॥ १६ ॥
इय वद्धमाणविज्ञा थवणं जो पढइ पइपभाइ मणं ।
सो हवइ जिणप्पहमइ मंगलकल्लाण आवासो ॥ १७ ॥

॥ इति वर्धमानविद्यास्तवनम् ॥

प्रवचनमङ्गलसारस्तवः ॥

नमः श्रीप्रवचनाय ॥

अरिहंते नमिऊणं सिद्धे आयरिअसव्वसाहू अ ।
पवयणमंगलसारं वुच्छामि अहं समासेणं ॥१॥
पढमं नमह जिणाणं ओहिजिणाणं च नमह सव्वेसिं ।
परमोहिजिणे नमह य अणंतओहीजिणे नमह ॥२॥
सव्वोहिजिणे वंदे पणमह भावेण केवलिजिणे अ ।
नमह य भवत्थकेवलिजिणनाहे तिविहजोएणं ॥३॥
पणमह उज्जुमईणं विउलमईणं च नमह सव्वेसिं ।
पण्हासमणे पणमह नमह तहा बीयबुद्धीणं ॥४॥
पणमेह कुट्टबुद्धी पयाणुसारीण नमह सव्वेसिं ।
पणमामि सुअहराणं पणमह संभिन्नसोआणं ॥५॥
पणमह चउदसपुव्वी तह दसपुव्वी अवायगे वंदे ।
इक्कारसंगसुत्तत्थधारए नमह आयरिए ॥६॥
चारणसमणे पणमह तह जंघाचारणे अ पणमामि ।
वंदे विज्जासिद्धे आगासगए अ जिणकप्पे ॥७॥
आमोसहिणो वंदे खेलोसहिजल्लमोसहे नमह ।
सव्वोसहिणो वंदे पणमह आसीविसे चेव ॥८॥
पणमह दिट्ठिविसिणो वयणविसे नमह तत्तलेसिल्ले ।
वंदामि सीअलेसे विप्पोसाहिणो अ वंदामि ॥९॥
खीरासवाण नमिमो महुआसवयाण वंदिमो चलणे ।
अमयासवाण पणमह अक्खीणमहाणसे वंदे ॥१०॥
पणमामि विउव्वीणं जलहीगमणाण भूमिमज्जीणं ।
वंदामि अणुअरूवे महल्लरूवे पणिवयामि ॥११॥

मणवेगिणो अ पणमह गिरिरायअइच्छगे पणिवयामि ।
दिस्सादिस्से नमिमो नमह य सव्विड्ढिसंपन्ने ॥१२॥
पणमह पडिमावन्ने तवोविहाणेसु चेव सव्वेसु ।
पणमामि गणहराणं जिणजणणीणं च पणमामि ॥१३॥
केवलनाणं पणमामि दंसणं तह य सव्वनाणाइं ।
चारित्तं पंचविहं तेसु अ जे साहुणो सव्वे ॥१४॥
चक्कं छत्तं रयणज्झउ अ चमराइं दुंदुहीकंती ।
सीहासणकिंकिल्ली पणमह वाणी जिणिंदस्स ॥१५॥
वंदामि सव्वसिद्धे पंचाणुत्तरनिवासिणो जे अ ।
लोगंतिए अ देवे वंदे सव्वे सुरिंदे अ ॥१६॥
आहारगदेहधरे उवसामगसेढिसंतिए वंदे ।
सम्मदिट्ठिप्पभिई सव्वे गुणठाणगे वंदे ॥१७॥
संती कुंथू अ अरो एआणं आसि नवमहानिहिणो ।
चउदसरयणाणि पुढो छन्नउईगामकोडीओ ॥१८॥
ता एआणं पणमह पणमह अन्ने वि चक्किणो सव्वे ।
जे अरहंति पणामं भवम्मि धुवभाविमुक्खाय ॥१९॥
बलकेसवाण जुअले पणमह अन्ने वि भव्वठाणे अ ।
सव्वे वि वंदणिज्जे पवयणसारे पणिवयामि ॥२०॥
ॐ मे अ वग्गु वग्गु सोमे सोमणस होइ महु महुरे ।
किलि किलि अप्पडिचक्का हिलि हिलि देवीउ सव्वाओ ॥२१॥
इअ पवयणस्स सारं मंगलमेअं तु पूइअं इत्थ ।
एअं जो पढइ नरो सम्मद्दिट्ठी वि.गोसग्गे ॥२२॥
तद्दिवसं तस्स भवे कल्लाणपरंपरा सुविहिअस्स ।
जं जं सुहं पसत्थं मंगल्लं होई तं तस्स ॥२३॥

इति प्रवचनमङ्गलसारस्तवः श्रीसूरिणा सूरिमन्त्रध्यानावसरे उभयसन्ध्यं च सम्यग् ध्येयः स्वपरहितार्थमिति ॥

श्रीपूर्णचन्द्रसूरिविरचितं

श्रीसूरिविद्यागर्भितलब्धिस्तोत्रम् ॥

उत्तत्तकणयवन्नं झाणं धरिऊण सुहगमुद्दाए ।
जो झाइ सूरिविज्जं तस्स वसे तिहुअणं सयलं ॥१॥
सजलजलवाहकालं झाणं धरिऊण चक्कमुद्दाए ।
जो झाइ सूरिविज्जं तस्स खय जाइ रिउवग्गो ॥२॥
जिण१-ओहि२-परमोहि३-अणंतोहि४-अणंतणंतओहिजिणा५ ।
केवलि६-भवत्थकेवलि७-अभवत्थि अ केवलीणं८ च ॥३॥
उज्जुमई९ विउलमई१० वेउव्वियलद्धि११-सव्वलद्धीणं१२ ।
पण्हासमणा१३ य तहा जंघाचारणमुणीणं१४ ॥४॥
विज्जासिद्धाणं१५ तहा आगासग(गा)मीण१६ तह य निच्चं पि ।
वयणविस१७-तत्तलेसाण१८ पणमिमो सीअलेसाणं१९ ॥५॥
चउदस२०-दसपुव्वीणं२१ इक्कारसअंगधारीणं२२ ।
तह य दुवालसअंगीणं२३ उग्गतवचरणधारीणं२४ ॥६॥
सव्वेसिं पि जिणाणं एएसि पयाण छट्ठिबहुवयणं ।
आइम्मि नमो सद्दो ॐ ह्रीँ सहिओ अ पढमपए ॥७॥
सुक्कज्झाणेणेसो कम्मक्खयकारणो परममंतो ।
झायव्वो अ तिकालं निच्चं परमिट्ठिमुद्दाए ॥८॥
खीरासव१-महुआसव२-अमिआसवलद्धिआण पत्तेअं३ ।
अक्खीणमहाणसलद्धिआण४ संभिन्नसोआणं५ ॥९॥
तत्तो पयाणुसारिअ लद्धीणं६ तह य बीअबुद्धीणं७ ।
तत्तो अ कुट्ठबुद्धीण९ सव्वपयाओ नमो आसी ॥१०॥
एएसि नमोक्कारं किच्चा इच्चाइ जा विज्जा स्वाहा ।
सोहग्गकरीविज्जा नायव्वा गुरुपसाएणं ॥११॥

किं सुअसुअसुहवन्नं झाणं धरिऊण जोणिमुद्दाए।
विज्जंसो सोहग्गं पावइ जवईण जोगं च ॥१२॥
उत्ततकणयवन्नं० ॥१३॥
सजलजलवाहवन्नं० ॥१४॥
इअ एए उवएसा सव्वे नाऊण झाइ जो सूरी।
सो पुन्नचंदसूरीण संमयं लहइ सिवसुक्खं ॥१५॥

इति श्रीसूरिविज्जागर्भितलब्धिस्तोत्रं समाप्तम् ॥
श्रीसूरिवराणां सदा पठनीयम् ॥छ॥

श्रीचक्रेश्वरसूरिरचितः

श्रीवर्धमानविद्यास्तवः ॥

विलसंत जोइबीए परमिष्ठीणं सरेमि पंचन्हं ।
सुह पुट्ठि तुट्ठि संतिग आरुग्ग एए पए पयउ ॥१॥
केवलसिरितिलयाणं अट्ठमहापाडिहेरकलियाणं ।
तिहुयणपणयाण नमो अरिहंताणं सयाकालं ॥२॥
सिद्धिगइसुवगयाणं अप्पडिहयनाणदंसणसिरीणं ।
सासयरुवाण नमो सिद्धाणमणंतसोक्खाणं ॥३॥
जिणपहपइट्ठियाणं पंचविहायारसारचरियाणं ।
पवयणवसहाण नमो आयरियाणं सुहनिहीणं ॥४॥
सययं नमो उवज्झायाणं अणवरयसुयपयायेणं ।
अणुगहियमुणिगणाणं अहीणवरणाणजलहीणं ॥५॥
निच्चं पि नमो लोए सव्वसाहूणमणहवित्तीणं ।
मुत्तिवहुसंगमुस्सुयमणसाण वि निरभिसंगाणं ॥६॥
तह ओहि-परमोहि-सव्वोहि-अणंतओसहीणं च ।
सज्जोइपयाण नमो जिणाण सव्वेसिमेएसिं ॥७॥
तस्स य नमो भगवओ महइ महासिद्धिणो कुणइ विज्जा ।
वीरे य सेणवीरे जयंति अपराजिए सव्वे ॥८॥
जाणेसो पंचनमुक्कारो निवसइ मणे महामंतो ।
ताण न पिसाय-साइणि-भूयाइ भयाइं पवहंति ॥९॥
सुमरियमित्तो वि इमो तिलोयरक्खा-विवक्खमणमहणो ।
रणरायगपसाइसु विजयपडायं पयच्छेइ ॥१०॥

श्रीमन्त्राधिराजगर्भितं

श्रीगौतमस्वामिस्तवनम् ॥

नमोऽस्तु श्री-ह्री-धृति-कीर्ति-बुद्धि-लक्ष्मीविलासैकनिकेतनाय ।
श्रीवीरपट्टाम्बरभास्कराय लोकोत्तमाय प्रभुगौतमाय ॥१॥
ॐकारमक्षीणमहानसानां श्रीमन्तमुज्जृम्भतपःप्रभावैः ।
ह्रीँमन्तमात्मानुगवन्दनेनार्हन्तं नमस्यामि तमिन्द्रभूतिम् ॥२॥
उन्निद्रसौवर्णसहस्रपत्रगर्भस्थसिंहासनसंनिषण्णम् ।
दिव्यातपत्रं परिवीज्यमानं सच्चामरैश्चामरराजसेव्यम् ॥३॥
कल्पद्रु-चिन्तामणि-कामधेनुसमाननामानममानशक्तिम् ।
अनेकलोकोत्तरलब्धिसिद्धं श्रीगौतमं धन्यतमाः स्मरन्ति ॥४॥
एकैव षड्दर्शनदृक्कनीनिका पुराणवेदागमजन्मभूमिका ।
आनन्द-चिद्-ब्रह्ममयी सरस्वती सदेन्द्रभूतेश्चरणोपसेविनी ॥५॥
सदा चतुष्षष्टिसुरेन्द्रमानसव्यामोहिनी पद्महृदाधिवासिनी ।
सर्वाङ्गशृङ्गारतरङ्गितद्युतिः श्रीगौतमं श्रीरपि वन्दते त्रिधा ॥६॥
जया-जयन्ती-विजया-ऽपराजिता-नन्दा-सुभद्राप्रमुखः सुरीजनः ।
प्रतिक्षणोज्जागरभूरिविभ्रमः श्रीगौतमं गायति गाढगौरवः ॥७॥
मानुषोत्तरगिरेः शिरः स्थिता दोः सहस्रसुभगा महाप्रभा ।
गीतगौतमगुणा त्रिविष्टपस्वामिनी शिवशतं दधातु मे ॥८॥
यक्षषोडशसहस्रनायको दिव्यविंशतिभुजो महाबलः ।
द्वादशाङ्गसमयाधिदेवता गौतमस्मृतिजुषां शिवङ्करः ॥९॥
ईशाननाथेन समं शतक्रतुः सनत्कुमाराधिपतिः सुरान्वितः ।
श्रीब्रह्मलोकाधिपतिश्च सेवते सगौतमं मन्त्रवरं पदे पदे ॥१०॥
अष्टनागकुलनायको मणिप्रोल्लसत्फणसहस्रभासुरः ।
गौत्तमाय धरणः कृताञ्जलिर्मन्त्रराजसहिताय वन्दते ॥११॥

गुणिओ अ सव्वपावप्पणासणो तह य मंगलाणं च ।
सव्वेसिं पढमं हवइ मंगलं सुमइसूरीहिं ॥११॥
वद्धमाणविज्जा चक्केसरपहुपसाय संपत्ता ।
पंचपरमिट्ठिणो मह हवंतु सुलहा पइ भवम्मि ॥१२॥

श्रीमन्त्राधिराजगर्भितं

श्रीगौतमस्वामिस्तवनम् ॥

नमोऽस्तु श्री-ह्री-धृति-कीर्ति-बुद्धि-लक्ष्मीविलासैकनिकेतनाय ।
श्रीवीरपट्टाम्बरभास्कराय लोकोत्तमाय प्रभुगौतमाय ॥१॥
ॐकारमक्षीणमहानसानां श्रीमन्तमुज्जृम्भतपःप्रभावैः ।
ह्रींमन्तमात्मानुगवन्दनेनार्हन्तं नमस्यामि तमिन्द्रभूतिम् ॥२॥
उन्निद्रसौवर्णसहस्रपत्रगर्भस्थसिंहासनसंनिषण्णम् ।
दिव्यातपत्रं परिवीज्यमानं सच्चामरैश्चामरराजसेव्यम् ॥३॥
कल्पद्रु-चिन्तामणि-कामधेनुसमाननामानममानशक्तिम् ।
अनेकलोकोत्तरलब्धिसिद्धं श्रीगौतमं धन्यतमाः स्मरन्ति ॥४॥
एकैव षड्दर्शनदृक्कनीनिका पुराणवेदागमजन्मभूमिका ।
आनन्द-चिद्-ब्रह्ममयी सरस्वती सदेन्द्रभूतेश्चरणोपसेविनी ॥५॥
सदा चतुष्षष्टिसुरेन्द्रमानसव्यामोहिनी पद्महृदाधिवासिनी ।
सर्वाङ्गशृङ्गारतरङ्गितद्युतिः श्रीगौतमं श्रीरपि वन्दते त्रिधा ॥६॥
जया-जयन्ती-विजया-ऽपराजिता-नन्दा-सुभद्राप्रमुखः सुरीजनः ।
प्रतिक्षणोजागरभूरिविभ्रमः श्रीगौतमं गायति गाढगौरवः ॥७॥
मानुषोत्तरगिरेः शिरः स्थिता दोः सहस्रसुभगा महाप्रभा ।
गीतगौतमगुणा त्रिविष्टपस्वामिनी शिवशतं ददातु मे ॥८॥
यक्षषोडशसहस्रनायको दिव्यविंशतिभुजो महाबलः ।
द्वादशाङ्गसमयाधिदेवता गौतमस्मृतिजुषां शिवङ्करः ॥९॥
ईशाननाथेन समं शतक्रतुः सनत्कुमाराधिपतिः सुरान्वितः ।
श्रीब्रह्मलोकाधिपतिश्च सेवते सगौतमं मन्त्रवरं पदे पदे ॥१०॥
अष्टनागकुलनायको मणिप्रोल्लसत्फणसहस्रभासुरः ।
गौत्तमाय धरणः कृताञ्जलिर्मन्त्रराजसहिताय वन्दते ॥११॥

रोहिणीप्रभृतयः सुराङ्गना वासवा अपि परे सदाश्रवाः ।
गौतमं मनसि यक्ष-यक्षिणीश्रेणयोऽपि दधती मुनीश्वरम् ॥१२॥
सज्जलान्नघनभोगधृतीनां लब्धिरद्भुततमेह भवे स्यात् ।
गौतमस्मरणतः परलोके भूर्भुवःस्वरपवर्गसुखानि ॥१३॥
ॐ क्रौं श्रीँ ह्रीँ मन्त्रतो ध्यानकाले पार्श्वे कृत्वा प्राञ्जलिः सर्वदेवान् ।
कायोत्सर्गैर्धूपकर्पूरवासैः पूजां कुर्यात् सर्वदा ब्रह्मचारी ॥१४॥
जितेन्द्रियः स्वल्पजलाभिषेकवान् शुद्धाम्बरो गुप्ति-समित्यलङ्कृतः ।
श्रीइन्द्रभूतेरुपर्वेणवं गुणान् स्मरन्नरः स्याच्छ्रुतसिन्धुपारगः ॥१५॥
तं श्रयन्ति पुरुषार्थसिद्धयो भूष्यते विशदसाहसेन सः ।
गौतमः प्रणयिभुक्तिमुक्तिदो यस्य भाविविभवस्य नायते ॥१६॥

[८-१]

श्रीमुनिसुन्दरसूरिविरचिता

श्रीसूरिमन्त्राधिष्ठायकस्तवत्रयी ॥

जयश्रियं श्रीजिनशासनस्य कलिद्विषोत्थोसिकुविघ्नहर्त्ता ।
परे य एते ब्रुवतेऽधुनापि श्रीसूरिमन्त्रं प्रयतः स्तवीमि ॥१॥
त्वं तीर्थकृत् त्वं परमं च तीर्थं त्वं गौतमस्त्वं गणभृत् सुधर्मा ।
त्वं विश्वनेता त्वमसि हितानां निधिः सुखानामिह मन्त्रराज ! ॥२॥
किं कामधेनुः सुरपादपो वा किं कामकुम्भः सुमनोमणिर्वा ।
यदि प्रसन्नः सकलेष्टदायी श्रीसूरिमन्त्रोऽसि जगत्यतिस्त्वं ॥३॥
